RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

॥ ओ३म् ॥

यस्य चाप्रियमिच्छेत
तस्य ब्रूयात् सदा प्रियम्।
व्याधो मृगबधं कर्तुं
गीतं गायति सुस्वरम्॥

(चाणक्य-नीति)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

स जीवति गुणा यस्य
यस्य धर्मः स जीवति।
गुणधर्मविहीनस्य जीवितं
निष्प्रयोजनम्॥

(चाणक्य-नीति)

卐 वर्षम्-७ 卐 अंकः-१७ (१५९) 卐 १ मार्चमासः २०१८ तः १५ मार्चमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## सर्वं एकस्मिने सूत्रे स्यापयति अस्माकं देशस्य कला,संस्कृति,भाषा -मनीषसिसौदिया

नवदेहली। अस्माकं देशस्य कला, संस्कृति एवं पुरातनीभाषा सर्वं देशवासिन एकस्मिन सूत्रे स्थापयति। आमजीवनाय संस्कृते वर्णित व्यवहारः अनुकरणीयोऽस्ति संस्कृतस्य विद्यायाः कारणमेव भारतं विश्वगुरु मन्यन्ते। विचारोऽयं दिल्ली सर्वकारस्य उपमुख्यमंत्री मनीषसिसौदिया वसन्तोत्सवस्य अवसरे सेन्ट्रलपार्क राजीवचौक नवदेहल्यां आयोजित कार्यक्रमे उक्तवान। कार्यक्रमोऽयं दिल्ली संस्कृतअकादमी माध्यमेन आयोजितो आसीत्। वसन्तोत्सवस्य शुभारम्य समये सिसौदिया उक्तवान यत् ते उपस्थित वृहद एवं युवकानाम् उत्साहं दृष्ट्वा अग्रेऽपि एतादृशस्य कार्यक्रमस्य आयोजनं करिष्यति। ते उक्तवन्तः यत भाषा संगीत कस्यापि धर्म-सम्प्रदायस्य विद्या नास्ति अपितु सर्वेषां



मानवजातीनां विद्या अस्ति। अस्मिन्नवसरे कृष्णग्रुप माध्यमेन हरियाणवी, राजस्थानी, कुमांयनी भाषाणां मूलगीतानां संस्कृते प्रस्तुतवान। दिल्लीप्रदेशस्य श्यामाप्रसादमुखर्जी महाविद्यालयस्य छात्रा माध्यमेन संस्कृते भंगड़ा, गिद्दा एवं कव्वाली इत्यस्य प्रस्तुतिमभवत्। अस्मिन्नवसरे दिल्लीसंस्कृतअकादम्याः उपाध्यक्षा उक्तवती यत् एवमेव कार्यक्रमेन संस्कृत भाषायाः निरन्तर प्रचार व प्रसार प्रचलति। आधुनिक युगे युवा छात्र-छात्राषु संस्कृत अध्ययनस्य विषये रूचि सन्ति।

## संस्कृत काव्येषु वर्णितोऽस्ति ज्ञान-विज्ञानस्य अनन्तधारा-प्रो.पी.एन.शास्त्री

नवदेहली। संस्कृत साहित्यस्य काव्यपक्षः बहु प्रभावि अस्ति। वयं गौरव पुर्वकं कथयितुं शक्नुमः यत् संस्कृतस्य प्राचीन साहित्यं काव्यमयोऽस्ति। काव्ये भाषायाः महत्वं भवति। संस्कृतस्य काव्यपक्षस्य वर्धनाय युवकान् स्व काव्य प्रस्तुतिकरणाय मंचस्य आवश्यकताऽस्ति। विचारोऽयं दिल्लीसंस्कृतअकादमी माध्यमेन आयोजित ''नवोदित कवि सम्मेलने'' मुख्यातिथि राष्ट्रियसंस्कृतसंस्थानस्य कुलपति प्रो.पी.एन.शास्त्री व्यक्तवन्तः। कार्यक्रमस्य अध्यक्षता समये अकादम्या उपाध्यक्षा कान्ताभाटिया उक्तवतीयत् कवीन् संत स्वतंत्र विचारस्य भवितव्यः। समाजे यस्य प्रकारस्य कवितानां आवश्यकताऽस्ति। तद्वदेव कृति भवितव्या। अस्मिन्नवसरे सेन्टस्टीफन




महाविद्यालयस्य आचार्य डॉ. आशुतोषमाथरः उक्तवान यत् युवावर्ग संस्कृतस्य नवीनकाव्यपरम्परायाः लेखने अग्रसर भूत्वा संस्कृत काव्यपक्षस्य समृद्ध भवितव्यम्। अस्मिन्नवसरे विशिष्टातिथि डॉ. बलरामशुक्ल, डॉ. क्षेमचन्द्र एवं डॉ. आभाझा अपि स्व विचारं व्यक्तवती सम्मेलने दिल्लीतः पंकजकुमारझा, श्रीमतीरेणुसिंह, हरिद्वारतः विपिनकुमारद्विवेदी कश्मीरतः डॉ.प्रमोदशुक्ल, उत्तराखण्डः डॉ पंकज, राजस्थानः श्रीवद्रीप्रसाद, एवं स्वेतादधिची इत्यादि अनेके कवयः स्वीय रचना प्रस्तुतवन्तः।


## साहित्यअकादमी माध्यमेन अन्ताराष्ट्रिय मातृभाषा दिवस्य अवसरे बहुभाषी कवि सम्मेलनस्य आयोजनम्

नवदेहली। साहित्यअकादमी माध्यमेन अन्ताराष्ट्रिय मातृभाषा दिवसस्य अवसरे बहुभाषी कवि सम्मेलनस्य आयोजनमभवत् बहुभाषी कवि सम्मेलने 23 भारतीय भाषाणां कवीन् आमंत्रितं कृतवन्तः।




प्रख्यात डोगरि कवयित्री पद्मासचदेवा अस्य सम्मेलनस्य उद्घाटनं कृतवती। स्वीये उद्घाटन वक्तव्ये उक्तवती यत् मातृभाषा अस्माकं मातृसदृशोरस्ति। एवं तस्याः सुरक्षा अस्माकं कर्तव्योऽस्ति। ते दुःखं प्रकटितवती यत् अग्रिम पीढ़ी स्वमातृभाषायाः प्रयोगः न करोति यस्य कारणं तस्याः विलोपनस्य आसंका जायते। डोगरी भाषायाः प्रसिद्ध कवि दीनूमाईपंतस्य पंक्तिं उधृतं कृत्वा सा उक्तवती यत् डोगरी अस्माकं माता अस्ति एवं हिन्दी पितामहि। ताः डोगर्यां स्वीय कविता प्रस्तुतवत्यः एवं किञ्चित डोगरि कवितानां हिन्दुअनुवादमपि प्रस्तुतवत्यः।

कार्यक्रमस्य प्रारम्भे साहित्यअकादम्याः सचिव के श्रीनिवासराव स्वीय स्वागतभाषणे उक्तवान् यत् मातृभाषया अस्माकं सांस्कृतिक परिचयो भवति एवं सा एव अस्माकं संस्कृति एवं संस्काराणां



संवाहकोऽस्ति। साहित्यअकादमी 24 भारतीय भाषणां अतिरिक्त अन्य वाचिक एवं क्षेत्रीय भाषायाः साहित्यं अग्रेसारणाय निरन्तर प्रयासरतोऽस्ति।

सर्वः आमन्त्रित कवयः स्वीय मूलभाषायां एवं अन्य कवितानां हिन्दी अथवा आंग्ल अनुवाद प्रस्तुतवन्तः कवितापाठी कवि कवयित्री आसीत्-जीवननारा (असमिया), देवकान्तरामचियारि (बोडो) गणेश बिसपुते (मराठी), अनामिका (हिन्दी), तहसीनमुनव्वर (उर्दू), सुजाताचौधरी, (ओडिया), मोहनहिमयाणी (सिंधी), प्रतिभानन्दकुमार (कन्नड), मालचंदतिवारी (राजस्थानी), हरीशमीनाश्रु (गुजराती), अरिवममेम्योबी (मणिपुरी), फेलोमिना सम्फांसिस्को (कोंकणी), उत्तमकुमाक्षेत्री (नेपाली), वनीता (पंजाबी), याकुब (तेलुगु), अनीताथम्पी (मलयालम), रमणकुमार सिंह (मैथिली), रमाकान्तशुक्ल संस्कृत साहित्यअकादम्याः सम्पादक (हिन्दी) अनुपमतिवारी कृतवान।




**डॉ.रमाकान्तशुक्लेन 'भाति मे भारतम्' इत्यस्यः कानिचित् पद्यानि विञ्च 'अहं स्वतंन्त्रता भणामि' इत्येषा रचना पठिता।**

# दिल्लीसंस्कृतअकादमी माध्यमेन संस्कृतसेवासम्मान समारोहस्य आयोजनम्

नवदेहली। दिल्लीसंस्कृतअकादमी माध्ययमेन 'संस्कृतसेवासम्मान' कार्यक्रमस्य आयोजनमभवत्। कार्यक्रमे



दिल्लीस्थित विद्यालय, महाविद्यालय एवं गुरूकुलस्य 400 इत्याधिक संस्कृतशिक्षकान् सम्मानित कृतवन्तः।

अस्मिन्नवसरे ''आमआदमी'' राजनैतिक दलस्य राष्ट्रिय प्रवक्ता श्रीहरीशअवस्थी उक्तवान यत् प्राचीनकालेनैव भारतीयशिक्षापद्धति सर्वश्रेष्ठोऽस्ति। गुरूशिष्य परम्परया संस्कृतसाहित्य एवं दर्शनम् सर्वोत्तमो मन्यते। अकादम्या उपाध्यक्षा कान्ताभाटिया उक्तवती यत शिक्षकः समाजस्य




प्रतिबिम्वोऽस्ति। ते सम्मानित शिक्षकैः अग्रेऽपि एतादृशमेव प्रदर्शनस्य विषये उक्त्वा धन्यवादः ज्ञापितवत्यः। अस्मिन्नवसरे विशिष्टातिथि डॉ. अश्विनीशास्त्री उक्तवान यत् विश्वे भारतस्य विद्वद्जनानां अधिक आवश्यकतसित दिल्लीसर्वकारः भाषायाः प्रचार-प्रसारे अनेक गतिविधि नाम् आयोजनं करोति।

# संस्कृतं विश्वकल्याणस्य आद्यारोऽस्ति-डॉ. द्विवेदी

कुरुक्षेत्र युनिवर्सिटी महाविद्यालयस्य संस्कृतविभागः संस्कृतभारत्याः सहयोगेन दश दिवसीय संस्कृतशिविरस्य आयोजनमकरोत् बुधवासरे आयोजित समापन समारोहे अनेके



विद्वान्सः, विचारक, नागरिक एवं शोधार्थी सम्मिलितो अभवन्। समारोहस्य मुख्यातिथि हरियाणा संस्कृत अकादम्याः उपाध्यक्ष डॉ. श्रेयांसद्विवेदी उक्तवान यत् वर्तमान युगस्य सर्वाषां (समस्यानां समाधानं संस्कृतस्य ग्रन्थे निहितोऽस्ति। संस्कृत भाषा देवभाषा अस्ति। वेद, गीता, रामायण एवं भारतीय दर्शने ज्ञानस्य निधि अस्ति।

ते उक्तवन्तः यत् अयं भाषादेश काल एवं परिधेः उपरि मानवमात्रस्य कल्याणस्य संदेशः प्रददाति। वास्तुशास्त्र, आयुर्वेद, ज्योतिष इत्यादि सर्वेषामाधारः संस्कृतमेव अस्ति। प्रपञ्चे केवलं संस्कृतभाषा एवं पूर्ण वैज्ञानिकोऽस्ति यो स्वीय आत्मनि लक्ष्य वर्षस्य इतिहासः स्थापयति एवं अद्यापि पूर्ण शुद्ध रूपेण अस्याः लेखनं भवति। इतः पूर्वं युनिवर्सिटी महाविद्यालयस्य प्राचार्यः सूरजभानमलिक उक्तवान यत् संस्कृतविभागः अस्य शिविरस्य आयोजनेन छात्रेषु संस्कृतं प्रति जागरूकता उत्पन्न अकरोत्। संस्कृतविभागस्य अध्यक्ष डॉ.सीडीएस कौशलः सर्वेषां अतिथिनां स्वागतमकरोत्। शिविरस्य संयोजकः डॉ. रामचन्द्रः शिविरस्य प्रस्तुति दत्तवान एवं उक्तवान यत् एषु प्रशिक्षणस्य कार्य त्रिलोचन एवं प्रदीपः कृतवान। शिविरस्य माध्यमेन 30 प्रतिभागि संस्कृते संभाषणस्य दक्षता प्राप्तवान्। कार्यक्रमस्य अध्यक्ष डॉ. ललितगौड़, संस्कृत सर्वाषां भाषाणां जननि अस्ति इत्युक्त्वा संस्कृत देशस्य सर्वेषु पाठ्यक्रमेषु अध्यापनस्य विषये उक्तवान। ते संस्कृतेन युक्त स्वानुभवान् ललितभाषायां उक्त्वा सर्व मंत्रमुग्ध कृतवन्तः। संस्कृतभारत्याः प्रान्ताध्यक्ष डॉ. सुरेन्द्रमोहनमिश्रः अन्य अतिथिजनेन सह प्रतिभागिजनानपि प्रमाणपत्रं दत्तवान एवं ते जीवने संस्कृतं प्रति आगमन्स्य प्रेरणा दत्तवन्तः डॉ. तेलुरामः कल्याणमंत्री एवं धन्यवाद ज्ञापितवान। अस्मिन्नवसरे स्वामीजगन्नाथपुरी, डॉ.विभाअग्रवाल, हरिदेव शास्त्री, डॉ. आरकेसूदन, डॉ. विश्वंभरशर्मा, डॉ.वीरेन्द्रपाल, रामविलासशास्त्री, डॉ. शिवानीशर्मा उपस्थित आसन्।

ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

**Girish Kumar Bansal,**
**Manager**

***Vidya Deep Public School***

**(Govt. Recognised)**

**C-400/A, Main Market Bhajan Pura, Delhi-110053**

**Mob.: +91-9555955591**
**+91-9810067099,+011-22563764**

खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

खादी वस्त्रों का विशाल भण्डार

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

खादी ग्रामोद्योग भवन

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

# जनपदसंस्कृतसम्मेलनम्

वार्ताहरः प्रमोदः गुरुग्रामः हरियाणा। फाल्गुन शुक्ल प्रतिपत्तिथौ संवत् 2074 शुक्रवासरे (16/02/2074) हरियाणा राज्ये गुरुग्राम जनपदस्य राजकीय वरिष्ठ माध्यमिक विद्यालये विभन्नानां संस्थानां सहयोगेन संस्कृतसम्मेलनं समायोजितम्। तत्र सत्रद्वयं प्रथमे सत्रे संस्कृतस्य वैभवम् इति विषये बौद्धिकम्, द्वितीये सत्रे साम्प्रतं समाजे संस्कृतस्य योगदानम् इति विषयमादाय प्रभावी चर्चा समभवत। सम्मेलने विज्ञान प्रदर्शनी, वस्तुप्रदर्शनी, पुस्तक प्रदर्शनी प्रभावोत्पादिका अवर्तत। तत्र श्रीमतां डॉ डी सुरेश महोदयानाम् (आयुक्त गुरुग्राम मण्डलस्य) मुख्यातिथित्वेन




श्रीमतां जयप्रकाशमहोदयानाम् (उत्तरक्षेत्रसंघटनमन्त्रिणां) निर्देशनेन मुख्यवक्तृत्वेन च श्री पं0माँगेराम शर्ममहोदयानाम् (अध्यक्षः, सन्मार्गः विश्व ब्राह्मण संघः, गुरुग्रामः) सारस्वतातिथित्वेन श्रीमतां श्री विनोद शर्ममहोदयानाम् (अध्यक्षः, भारतीय बाल बैडमिण्टन संघ एवं नैतिक और सांस्कृतिक प्रशिक्षण संघ हरियाणा (आई. एम. सी. टी. एफ.) अध्यक्षतायाम् डॉ श्रेयांश द्विवेदी उपाध्यक्षः संस्कृतभारती प्रास्ताविकेन, संरक्षणेन च श्रीमती गीता आर्या महोदयायाः संयोजनेन श्री प्रमोदः श्री सतेन्द्रः श्री अमनदीपः सुयोग्यानां कुशलमञ्चसञ्चालनेन डॉ सत्येन्द्रः सत्यम्, श्री शिवकुमार शास्त्री, श्री मुकेश शास्त्री, श्री ब्रह्मशास्त्री प्रभृतीनां प्रबन्धने तथा च प्रो तएजःपाल शर्मा, पूर्वाचार्यः श्री जगन्नाथ संस्कृतविश्वविद्यालयःपुरी,प्रो कमला भारद्वाजः, आचार्या श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम् , डॉ हरिराम मिश्रःआचार्यःजवाहरलालनेहरू विश्वविद्यालय डॉ यशवीर आचार्यः श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम् , आचार्य राघवेन्द्र भट्टः, प्राचार्यः, शृङ्गेरी वेदपाठशाला, गुरुग्रामः,डॉ मदनमोहन भट्टः, प्राचार्यः, संस्कृत महाविद्यालयः, हरिमन्दिरम्, पटौदी,

डॉ इन्दुरावः, प्रान्तसंयोजिका, दुर्गावाहिनी, हरियाणा।

श्री सत्यदेवः, अध्यक्षः, संस्कृताध्यापकसंघः गुरुग्रामः।

श्री ईश्वर मित्तल, अध्यक्षः, विहिप फरीदाबाद विभागः।

श्री बीरेन्द्र यादव, हबलू नम्बरदार, जिलापार्षदः, गुरुग्रामः, श्री राजकुमार सौदा, वाल्मीकि मन्दिर गुरुग्रामः, श्री प्रीतम सिंहः, अध्यक्षः, जाट कल्याण सभा गुरुग्रामः, श्री प्रवीणयादवः,अध्यक्षः, यादवकल्याणपरिषद्, गुरुग्रामः, श्री ईश्वर सिंहः, अध्यक्षः, सर छोटू राम शिक्षा एवं सांस्कृतिक समिति, गुरुग्रामः, श्री मुकुलशर्मा सुमन, महामन्त्री, प्रादेशिकहिन्दीसाहित्यसम्मेलनम् ,गुरुग्रामः, श्री वसन्त सिंह राघवः, समाजसेवी, श्री नत्थूरामः, अध्यक्षः, धर्मप्रसारः,गुरुग्रामः, श्री सुरेशः,पूर्वसरपंचः, बेगमपुरखटोला, गुरुग्रामः, श्री दुलीचन्दः,पूर्वसरपंचः, नरसिंहपुरम्, गुरुग्रामःप्रभृतीनां त्रिशताधिकं संस्कृतानुरागिणां समुपस्थितौ भव्यं जनपदसंस्कृत सम्मेलनम् सम्पन्नम्।

## संस्कृतसम्मेलनम्

वार्ताहरः नीरजः नारायणगढम् अम्बाला, हरियाणा। फाल्गुन शुक्ल नवम्यां संवत् 2074 रविवासरे (25/02/2074) हरियाणा राज्ये अम्बाला जनपदस्य नारायणगढस्थे श्रीमद्भगवद्गीता वरिष्ठ माध्यमिक विद्यालये विभन्नानां संस्थानां सहयोगेन संस्कृतसम्मेलनं समायोजितम्। तत्र सत्रद्वयं प्रथमे सत्रे संस्कृतस्य वैभवम् इति विषये बौद्धिकम्, द्वितीये सत्रे भारतस्य नव निर्माणे संस्कृतस्य योगदानम् इति विषयमादाय प्रभावी चर्चा समभवत। सम्मेलने विज्ञान




प्रदर्शनी, वस्तुप्रदर्शनी, पुस्तक प्रदर्शनी प्रभावोत्पादिका अवर्तत। तत्र श्रीमतां जयप्रकाशमहोदयानाम् (उत्तरक्षेत्रसंघटनमन्त्रिणां) निर्देशनेन प्रो चाँदकिरण सलूजा महोदयानां (निदेशक संस्कृत संवर्धन प्रतिष्ठानम्) मुख्यवक्तृत्वेन, श्रीमताम् अनम महोदयानां (प्रान्त प्रचारक प्रमुखः सम्पर्काधिकारी संस्कृतभारती) समुपस्थितौ श्रीमतां विजय अग्रवालमहोदयानां (शंकराचार्य परम्परानुरागी, उद्योगपतिः, संस्कृतानुरागी) मुख्यातिथित्वे ,श्रीमतां ऋषिराज वासिष्ठ महोदयानाम् ( अध्यक्षः भारतीय चिकित्सापरिषद् , हरियाणा) अध्यक्षतायाम् डॉ श्रेयांश द्विवेदी उपाध्यक्षः संस्कृतभारती प्रास्ताविकेन, श्री जोगिन्द्र सिंहः प्रान्तमन्त्री संस्कृतभारती संयोजनेन श्री नीरजः श्री भूपेन्द्रः श्री राजेशःसुयोग्यानां कुशलमञ्चसञ्चालनेन पञ्चशताधिकं संस्कृतानुरागिणां समुपस्थितौ भव्यं जनपदसंस्कृत सम्मेलनम् सम्पन्नम्।

# भारतीयभाषामंच एवं संस्कृतशिक्षकसंघस्य संयुक्ततत्वाधाने अन्ताराष्ट्रिय मातृभाषादिवसे सम्मान समारोहः

नवदेहली। अन्तराष्ट्रीय मातृभाषा दिवस समारोहः 26.2.2018 दिनांके भारतीयभाषामंच एवं संस्कृतशिक्षक संघ माध्यमेन अन्ताराष्ट्रीय मातृभाषा दिवसस्य अवसरे एकं आयोजनमकरोत। आयोजनमिदं दिल्लीपब्लिकलाइब्रेरी, सभागार, एस.पी.मार्ग देहल्यां अयोजितो अभवत्। एषु



हिन्दी, संस्कृत, उर्दू, पंजाबी, सिंधी, मैथिली आदि भाषानां भाषाप्रेमी सम्मिलितो अभवत्। कार्यक्रमे भारतीय भाषायै विशिष्ट कर्तृणां सम्मानितो अकरोत्। कार्यक्रमे डॉ. रविप्रकाशटेकचंदानी हिन्दी एवं संधी, उूर्द तथा पंजाबी भाषां एक क्षेत्र अथवा एक वर्ग विशेषस्य भाषा न स्वीकृत्य सम्पूर्ण भारतस्य अस्ति इत्युक्तम्। डॉ. विनोदबब्बरः मातृभाषा एवं मातृभूमेः भाषां अक्षि



सदृशमुक्तवान एवं तृतीयनेत्र आंग्लभाषया सावधान भवितुम् उक्तवान। डॉ. कमलाभारद्वाज संस्कृतभाषायाः विशेषता विषये उक्तवती यत् संस्कृत भाषा विश्वस्य श्रेष्ठ एवं प्राचीन भाषारस्ति। मिर्जाइफितखार हुसैन एवं मिलित्व भारतीयभाषाः संरक्षनार्थमुक्तवान। अधिवक्ता श्रीउमेशकुमारशर्मा स्व मातृभाषया सह राजभाषायाः सम्मानकर्तुमुक्तवान। समारोहे संगीतनाटकअकादमी (संस्कृति मंत्रालय भारतसर्वकारः) माध्यमेन मनमोहक सांस्कृतिक कार्यक्रमस्य प्रस्तुति अभवत्। कार्यक्रमे डॉ वी दयालु, डॉ. ब्रजेश गौतम, डॉ. यशवीर सिंह, शम्सउद्दीन मो नाजिम, श्री संदीपकुमार उपाध्याय, राहुलशर्मा इत्यादय उपस्थिताः आसन्।

## शीताहतसूर्यगीतम्



-डा.अरविन्दकुमारतिवारी

शृण्वन्तु हे कविवराः कविताविलासा
भार्याकपोलकचकम्बलसम्बला भोः।
हा रश्मयो मम निशानलसेवनार्थं
याताः कुतः कथमहं करवाणि भातम्? 1

शीतप्रभीतगृहिणी निजमातृगेहं
याता विहाय मिहिरं कुपतिं प्रभाष्य।
अश्वा रथात्प्रचलिताः क्व च शीतभीताः
नष्टे बले स्वजनतां विजहाति को नो ?2

अद्यावकाश इति हा प्रवदन्ति सर्वे
किन्तु प्रभो न तु रवेः रविवासरेह्यपि।
किं किं कलत्ररहितो निशि साधयेयं
शीताहता स्वसदने विरमन्ति नो किम् ?3

कश्चित् कविर्वदति मां कुपितो निशीथे
मान्यो महेश इव भोः कुरु सुप्रभातम्।
कश्चिद् दिवा दिशति हा बलशून्यमद्य
रुष्टः कुतः कथमहं करवाणि भातम्।।4

अस्तु प्रसन्नवदनाः कवयो यथा स्याद्
अस्यारविन्दमुकुलस्य विलासमेवम्।
तद्वै विचिन्तयति मे हृदयं विधातुं
प्रीतः प्रभातमचिरं मुदितः करिष्ये।।5

# सम्पादकीयम्

## ''उतिष्ठत जागृत विकासञ्च कुरुत''

''उतिष्ठत जागृत।''। उत्थानं कुर्वन्तु जागृताः भवन्तु अयं श्रुतिवाक्यस्य आदेशोऽस्ति। परमपितुः प्रत्येकम् अन्तःकरणे गुञ्जायमानः उद्घोषोऽस्ति। इदं केन श्रुतम्, केन न श्रुतम् इति न जायते परञ्च इदं वाक्यम् वारम्वारं गुञ्जति तथा च इदं अस्मदन्तद्वरिम् वारम्वारम् प्रणुदति विश्वे प्रायः सर्वाः बाधाः प्रत्येकम् दुःखानि प्रत्येकं विच्छेदः शतम् शतम् वारम् अस्मदन्तरात्मनः तन्त्रिकानां व्याघातं कृत्वा झङकारयति तथा च ततः केवलमेकैव वाणी निःसृता भवति। यत् ''उतिष्ठत जागृत''।

अरुमन्नवजागरणस्य कृते अन्तः कारणे प्रतिष्ठितः सः आत्मदेवः निखिलानिमेषनेत्रैश्च प्रतीक्षारतोऽस्ति यत् कदा प्रभातम् आगमिष्यति कदा रात्रेः इदं तमः दूरीकृत्य अस्मदपूर्णविकासम् निर्मलनवोदितलोकेन प्रकाशमानम् उदीयमानञ्च करिष्यति।

पुष्पम् प्रभाते सति कथयति यत् 'रात्रिर्गता' प्रभातम् अभवत् त्वम् अधुना प्रस्फुटितम् भव। इयम् आत्मविस्तारस्य एका सहजा प्रेरणाऽस्ति यत् पुष्पम् प्रफुल्लितं विकसितञ्च करोति। मनुष्यः एवं तादृशः प्राणी अस्ति, यश्चिन्तयति यत् कथन्न विश्वव्याप्तानन्दकिरणवृष्टिभिः एवमेव स्वाभाविकतया सोऽपि विकसितो भूत्वोस्तिष्ठेत्। सः किमर्थम् स्वपक्षान् सङकुचान् कृत्वा उपविशन्नस्ति। प्रभातकालीन सूर्यादारभ्य प्रकृतेः कण-कणः निखिलं जगत् प्रतिक्षणम् माम् एतदेव कथयति यत् स्वस्य समर्पणं करोतु। स्वस्वार्थान्मुखं परिभ्राम्य एकवारम् अस्मिन् दुःखसुखादिभिः परिपूरिते विचित्रे विश्वे अचिन्त्यागोचारब्रह्मसत्तां प्रति स्वम् समर्पयतु।

## वेदामृतम्

(ऋग्वेदभाष्यम्)

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**सुतेसुते न्योकसे बृहद् बृहत एदरिः।**
**इन्द्राय शूषमर्चति॥10॥**

अर्थ-जब शत्रु मनुष्य भी सब में व्यापक मङ्गलमय, उपमारहित परमेश्वर के प्रति नम्र होता है, तो जो ईश्वर की आज्ञा और उसकी उपासना में वर्तमान मनुष्य हैं, वे ईश्वर के लिए नम्र क्यों न हों? जो ऐसे हैं,

वे ही बड़े-बड़े गुणों से महात्मा होकर सब से सत्कार किये जाने के योग्य होते और वे ही विद्या और चक्रवर्ती राज्य के आनन्द को प्राप्त होते हैं। जो उनसे विपरीत हैं। वे उस आनन्द को कभी प्राप्त नहीं हो सकते ॥10॥

इस पूक्त में इन्द्र शब्द के वर्णन, उत्तम-उत्तम धन आदि की प्राप्ति के अर्थ ईश्वर की प्रार्थना और अपने पुरुषार्थ करने की आज्ञा के प्रतिपादन करने से इस नवमे सूक्त के अर्थ की संगति आठवें सूक्त के साथ मिलती है, ऐसा समझना चाहिए।

**यह नवमा सूक्त और अठारहवाँ वर्ग पूरा हुआ।**

[१०] अथ द्वादशचंस्य दशमस्य सूक्तस्य मधुच्छन्दा ऋषिः । इन्द्रो देवता। १-३, ५, ६ विराडनुष्टुप्; ४ भुरिगुष्णिक्; ७, ९-१२ अनुष्टुप्; ८ निचृदनुष्टुप् छन्दः।१-३, ५-१२

गान्धारः; ४ ऋषभः स्वरः ।।

अब दशम सूक्त का आरम्भ किया जाता है। इस सूक्त के प्रथम मन्त्र में इस बात का प्रकाश किया है कि कौन-कौन पुरुष किस-किस प्रकार से इन्द्रसंज्ञक परमेश्वर का पूजन करते हैं।–

# शब्दकर्मधातूनां यथारुपस्तथा प्रयोगे प्रयत्नो चिन्तनञ्च

-रोहित (शोधच्छात्रः)
दिल्ली विश्वविद्यालय, दिल्ली
दूरभाष- 7503934264

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[1]।**

मात्रेणैवानेनैव वचनेन स्फुटं यच्छब्दात्मकं संसारं शब्दप्रकाशितेऽर्थे सुखमनुभवति चेतो लोकश्चापि। मनोऽवस्थितचेतसाऽभिप्राये निहिते सत्येव फलदायको भवति। विषयमिमं विशदतया भाष्यकृता फणिपतिनाऽष्टकाख्यानाह्निकपस्पशायां 'त्रयोदशात्मके संख्यात्मके शब्दानुशासनानां गौणप्रयोगे व्याख्यातं हि[2]। सामान्यतः शब्देन व्यवहारः लोके प्रतिव्यक्तिभिन्नतायाः परिचयाह्वानव्यापारप्रयोगात्मिकः, यथा कश्चिद् रामादितरत् समानाकृतिमानुषमाकारयितुमीहते तस्यामवस्थायां सः 'ओये,ओ, अरे' इत्यादिभिरनेकैरसभ्यापशब्दप्रयोगैर्न शक्नोति तमाह्वानम् ,तेन यदि समानायामप्याकृतिवर्णाश्रयं व्यक्तिं 'रमेशः' इति नामापरेण आह्वयेत तर्हि व्यवहारे सारल्यं स्यादेव।

अस्माकं संस्कृतौ नाम्नः नामकरणस्य वा या पूर्वजाभिमता परम्परा राजते तस्याः महत्वं न केवलं लोकव्यवहारप्रसंग एव प्रत्युतः नाम्ना तस्य-तस्य प्रतिव्यक्तेः व्यवहारस्य पूर्वानुमानमपि मीयते स्म । मनोवैज्ञानिक्या चिन्तनशैल्या काले मासे नक्षत्रे च जनितस्य शिशोरायुषः कर्मश्रमस्वास्थ्यानामपि विषयो व्याख्यायते स्म।

इदानीन्तु परम्परामिमामुपहसन्ति पाश्चात्यविचारधाराप्रवाहवाहिन्यां निवसन्तो जनाः।

शब्दस्य शब्दयोः शब्दानां वा प्रयोगविषयः संदर्भानुकूल एव प्रशस्यो भवति तदेतज्ज्ञानं लोके मध्यम-उत्तमवृद्धव्यवहारेण[3] जायते। शब्देन शब्दाभ्यां शब्दैर्वा शब्दाः न कथ्यन्ते अतः अर्थप्रामुख्यं पुरस्कुर्वता जनेन संदर्भानुकूलशब्द एव प्रयोक्तव्यः। कमप्यर्थप्रदं शब्दं न जानन्यदि कोऽपि प्रयुङ्क्ते चेत्तद् हास्यास्पदं भवति,अथापि कोऽप्यन्यः कमप्यर्थप्रदं शब्दं न जानन्यदि प्रयोक्तारमुपहसति सोऽपि खिन्नचेतः खिद्यते कालात्परेण। एवं कः शब्दः प्रयोक्तव्यः? को वाऽभिप्रायविशेषः प्रयोक्तुरिदं मनीषया विज्ञाय एव व्यवहारः स्यात् ।

अथ विषयाभिमुखं यामः। पाणिनिना संगृहीताः धातवः 2000 परिमितास्सन्ति तेषु च शब्दकर्मधातवः 196[4] सन्ति। इमे संगृहीताः धातवः व्यक्तवाचि अव्यक्तवाचि शब्दार्थाः शब्दे क्रन्दने आह्वानादिषु चान्यसंकेतितार्थेषु दृश्यन्ते। प्रायेण हि संस्कृतधातुभिः कृतसंज्ञकाः वस्तुपदार्थाः अन्वर्थरुपा एव ,यथाह यास्कः- नद्यः कस्मात्? नदना इमा शब्दवत्यः[5] । एभिः धातुभिः साहित्यस्य महदुपकृतफलित इति लक्ष्यते, कथञ्चेज्जिज्ञासितं श्लोकमिममवलोकयामः-

**पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**
**षष्ठं गुरुः विजानीयात् एतदनुष्टुपलक्षणम्[6]॥**

अनेन विधिना पुष्टः श्लोक एव अनुष्टुप् छन्दे स्तूयतेऽन्यभ्रष्टलक्षणस्तु गर्ह्यत एव । व्याकरणशास्त्राभिमतं 'संयोगे गुरु[7]' इत्येव इहापि तेन 'भर्त्सितः,तर्जितः, प्रयोगाभ्यामुभाभ्यां भवेद्व्यवहारकाव्यशास्त्रविचक्षणैः काव्ये। एषः दृष्टान्तः किल सामान्येन। छन्दानां लक्षणाभिरुपं 'अनुप्रासादिष्वलंकारेषु रसविपाकविनोदकर्मणे विभिन्नधातूनामस्तित्वे सत्येव संभवति काव्यक्रीडा। इमामेव काव्यक्रीडां चिक्रीडिषया मया शब्दकर्मधतूनां प्रयोगाणामल्पयत्नो विहितः , इह प्रयुक्ताः धातवः प्रायेण साहित्ये प्रचुरतया स्फुटञ्च नोपलभ्यन्ते अतो हेतोः भवद्भिरयं यत्नो निपुणं निरीक्ष्य निस्संकोचं समालोचनीयं परिष्काराय भावेषु रसभङ्गक्रमेषु प्रखरप्रतिभाधनिभिर्नूनम्।

अथ भिन्नशब्दकर्मधातूनामयं प्रयोगस्तावत्-

**वन्दे काव्यपरम्पराङ्कुरयुतं श्रीवल्मीकाख्यं गुरुम्**
**यस्य श्लोकरपारशोकगहने वृन्दारको मन्दते।**
**प्रातः वन्द्यरनेन रामगदितम्मन्ये खगाः ह्राद्यते**
**सः श्लोकांशं अमुं करोतु कृपया ह्रादांशदोषं परे[8]॥**

इह वदि ख्याञ् मदि गद ह्राद ह्राद चेति षट्कसम्पत्तीव धतुभिरेभिः नानार्थप्रधानभावाः प्रदर्शिताः वर्तन्ते। एत्र अभिवादनप्रकारः तत्र वन्दे (वदि[9]),यत्र प्रसिद्धिकथनं तत्र आख्यम्(ख्या[10]),यत्र स्तुत्यर्थः तत्र मन्दते(मदि[11]),यत्र व्यक्तवाग्विषयः तत्र गदितम्(गद[12]),अथ अव्यक्तवाचः प्रयोगस्तत्र ह्राद्यते(ह्राद[13]) चान्ते सैवार्थगतमसारुप्यं तत्र ह्राद(ह्राद[14]) इति स्फुटमेव। काव्ये धातूनां प्रयोगैरिह अभिप्रायः स्पष्टमेव; इमे धतवः पाणिनिमुनिना धातुपाठे संगृहीतास्त एव । अथ तैः धतुभिरीषद्भिन्नार्थकं रुपमिभिन्नत्वमधुनाऽवलोकयामः-

(दीन वर्णनम्)

**यथा दीनो क्षुधा क्षुब्धः क्षीजते निर्बलोऽपि यः।**
**सैषा स्थितिस्समस्तानां गिरा भावप्रकाशनैः॥**
**क्रोधावेगविवेकशून्यमनसा हर्षेऽति हर्षं ह्वदा**
**दुःखाग्नौ ज्वलितो नितान्तगरलश्चित्तं मुहू रोदितैः।**
**भीतश्चेत अशान्तभग्नगतिकःकष्टे कथं क्षीजते?**
**स्थायीभावनिसर्गदेहरचना व्यक्ता गिरा दृश्यते॥**

(युग्मकम्)[15]॥

क्षीज अव्यक्ते शब्दे[16] धातुं प्रयुज्य 'क्षुधा क्षुब्धः क्षीजते —' इति अनुप्रासप्रयोगरसविपाकः[17] ,तच्च नान्येन समानार्थकेण शक्यते चमत्कर्तुञ्चेतः।

ततः वीरत्व प्रकाशने -

(वीरत्व प्रकाशनम्)

**अत्युत्साहविदग्धमन्युयुवको नेत्रे भृशं रक्तिमे**
**शत्रूणामनिशं निदाघविभवौ हस्तौ स्फुरन्तौ ततः।**
**श्वासोच्छ्वासगतिर्विशेषहृदयःसंयुज्य चोष्ठौ मिथः**
**भण्डेते रपतः पनायत इह ध्वन्यां रसो वीर्यजः॥[18]**

इह भण्डेते[19] रपतः[20] पनायतः[21] इति वीरोचितरसविपाके युक्त एव धातुप्रयोगाः परैर्धातुभिः वद् गद ख्याञ् एभिः कृतप्रयोगैरीषद्वा क्षीणरस उत्पद्येत नूनं तेन अयं वरः प्रयोगः।

(अज्ञ-कथा)

**ज्ञानभारगुणैर्हीना अज्ञरिक्तकदाचाराः।**
**भण्डन्तेऽमण्डिताः लोके निसर्गसर्ग ईदृशः॥[22]**

इहापि तदेव 'भडि परिभाषणे[23]' धात्वोः प्रयोगो युक्तो लक्ष्यते यतो विद्वान्तु वदति[24] गदति[25] आख्याति[26] च।

(स्वामि-चर्या सेवके)

**शीभते शल्भते भृत्यो याति संयमितेऽमितम्।**
**सामर्षं व्यवहाराणां स्वामिनो सेवकाः वशे॥[27]**

(शिशोः दुःखमपाये पिता चर्या)

**स्वप्नानन्दनिमग्नकांक्षितफले प्राप्तो मुदा भाविते**
**पर्यङ्कात्पतितश्शिशोस्तु रुदितं श्रुत्वा पिता भाषते।**
**पश्य! त्वं तव लालदृप्तशिशुना व्यापादिताः कीटकाः**
**इत्थं नैकविभक्तशल्भवचनैः बालं मुहुश्शीभते॥[28]**

अत्र समानार्थको भिन्नरुपात्मकः प्रयोगः प्रशंसायां श्लाघृ[29] धातोरितरः।

(परिवारे जातस्य हर्षः)

**मातुरङ्कं परत्र यः सृष्टिरस्तीति चिन्तने।**
**अशक्तस्सः रदागतैः तण्डुलांशैः रपत्यहो॥[30]**

इह निसर्गप्रयोगः आदौ बालो लपति[31] अर्थात् लकारं स्फुटं भाषते ततरागतै रदै 'र' इति मूर्धन्यकठोरं रपति[32] । अहो! ध्वनिविज्ञानस्य महत्वे मनोवैज्ञानिकं चिन्तनं पूर्वजानाम्।

(भिन्नावस्था भिन्नाकथा)

**भिक्षुको याचते भिक्षां भल्लते भ्रष्टधीः भृशम्।**
**नेता शोभति शुम्भति यथावस्था तथा मतिः॥[33]**

इह 'भ' महाप्राणस्य[34] सुरुचिरः प्रयोगः --भिक्षां भल्लते भ्रष्टधीः भृशम्' इतिप्रयोगः। भिन्नावस्थे नराः यथा व्यवहरन्ति तथास्ति वर्णितमिह।

(द्विविधो जनः)

**पनायति पणायति व्यवहारे स्तुतौ मतौ।**
**पनायत्यर्चको भक्त्या वणिक्पण्यं पणायति॥[35]**

अहो! रचना । अत्र क्रियया प्रारब्धः पद्यः क्रिययैव समाप्तिमगमत्,रचनायामस्यां नकारस्य णकारे परिवर्तितरुपेण भिन्नार्थप्रयोगो दृष्टान्तालंकारे[36] दर्शितः।

(यून आकांक्षा)

**साऽवस्था दयिता ममापि भविता स्नेहाश्रया कांक्षते**
**षण्णां त्रित्वयुते विनोदवशगः स्पर्शे सुखं मन्यते ।**
**कन्यां कामयते तयाल्पलपिते पुष्टोऽपि सः क्नूयते**
**क्नूयन्ते मदनेन विद्धहृदयाः सैषा स्थितिः प्राणिनाम्॥[37]**

इह यून आकांक्षां ज्ञापयन् 'क्नूयी[38]' इति शब्दकर्मणः प्रयोगः कामुकेन काम्यते इति स्फुटमेव मदनेषुभिः विद्धाः क्नूयन्त एव

शेषभागःपंचमपुटे

चतुर्थपुटस्य शेषभागः

# शब्दकर्मधातूनां यथारुपस्तथा....

न तु शब्दायन्ते[39]।

(यथावस्थस्तथाऽऽचारः)

**कन्यां कामयते कामी कुलजा कुलचारिणा।**
**कुसुमायुधबाणेन क्नूयते कामिनो मनः॥[40]**

इह यून आकांक्षां ज्ञापयन् क्नूयी[41] इति शब्दकर्मणः धातोः प्रयोगःकामुकेन काम्यत इति स्फुटम्। अपरत्र नैसर्गिकी रचना मदनेन विद्धाः ननु क्नूयन्त[42] एव न तु शब्दायन्ते[43]। अनुप्रासालंकारे[44] प्रयोगः नूनं हार्द्यम् 'ककारस्य'।

(जलं रक्ष्यं जन्तुभिः)

**नद्याः तीरविभग्नछाखिन इयं शाखा जले रासते**
**कल्लोलैर्नदति प्रवाहमधुरं स्पर्शे ह्रदा वर्हते।**
**त्वत्सिक्तास्तरवो फलन्ति विविधैः मूले मुलस्त्वं भुवः**
**नास्यन्तामभिरक्षणीयममलं नीरं नरैर्नास्यताम्॥[45]**

इह 'जलं रक्ष्यं जन्तुभिः' इतिविषयं रासते[46] वर्हते[47] तदनु च अनुप्रासयुतेन[48] प्रयोगेण–नीरं नरैर्नासताम्[49] दर्शितो लक्ष्यते।

(यथा रुपस्तथा ध्वनिः)

**नासते पेटितः पात्रं वर्हति हर्षितोऽसुखे।**
**चेतनेषु निजारम्भरचेतनेष्वपि ध्वनिः॥[50]**

(हरस्य नृत्ये भीता धरा)

**नृत्यारम्भहरात्पदोपहननाद्विक्लन्दतीं बर्हतीम्**
**विश्लेषैस्तरवो नमन्ति धरणीं वारांनिधिः क्षोभणः।**
**नद्यः कूलनिपातनेन भयदा नीराश्रयाः जन्तवः**
**स्तब्धाऽऽकाशविकाशने विघटिते पक्षीगणाः विस्मिताः॥[51]**

इह प्रसिद्धस्य धूर्जटेः नृत्यति धरायाः बर्हति[52] इति प्रयोगेण रसविपाको यथारूपः।

(युक्तो नरो हिते हि सः)

**दंसयति दयाऽऽकरः वल्हयति परे हिते।**
**स्खलितो भ्रंशितो लोके माने चीवयते स्वकम्॥[53]**

(गर्विता नराः)

**दंसयन्ति दलात्खिन्नाराधिपत्यं चिकीर्षकाः।**
**तण्डुलैस्तर्जितास्तुषास्स्खलयन्ति गवां मुखे॥[54]**

इह उपरिवर्णितानां धातुनामितरत् भाषार्थकैः 'दसि[55],वल्ह[56],चीव[57] एतेज्ञां धातूनां प्रयोगो दृष्टान्तालंकारे[58] वर्णितः।

(धनाढ्याः खिद्राश्च नराः)

**कांस्या लौहसुवर्णताम्ररचनाः भूमौ निपाते महत्**
**पारुष्यं स्खलयन्परिक्रमरताश्चाढ्याः भवन्तीदृशाः।**
**मृत्पात्रं स्खलिते कराद्भुवरधस्स्तोकं त्वरा शब्दजम्**
**यल्लोके वलयन्ति दर्पबहुना चित्रं स्थितिः प्राणिनाम्॥[59]**

(रणे ध्वनिनिकरः)

**रणयन्ति रणे कुन्ताः खड्गैःखड्गाः प्रतिस्वराः।**
**ध्वनयन्ति धनुर्धराः यमधानीमभीषुभिः॥[60]**

इह रणप्रसंगं ब्रूते. तच्च रणयन्ति[61] रणे –, खड्गैः खड्गाः ख्र, ध्वनयन्ति[62] धनुर्धराः – प्रयोगैरनुप्रासरचितम्।

(खिन्नो नरः)

**क्वचिदतिविरलाशा विप्रयोगाद्विखिद्रः त्रपयति निजं क्रोधे त्यक्तसङ्गप्रियायाः।**
**रणयति निजचेतः त्यक्तभोगेऽविरागः हतविधिलसितोऽस्मि क्षुब्धदैवो मदीयः॥**

इह 'खिन्नं नरं वर्णयन् ' त्रपयति[63] भाषार्थकेन धातुना त्रपा[64](लज्जां) द्योतयितुं कामो यत्नः।

(क्षुधार्त्त-कथा)

**क्षपां क्षुधा क्षामः क्षपयति विनिद्रोदरहतः**
**इयत्कालं घूर्णन्नपि मधुनिसर्गा पिबति वाः।**
**त्रपायां संकोचे निजहनुसकाशं कृततनुः**
**यथावस्थं नग्नोऽनलजलसमीराश्रयवपुः॥[65]**

(दुर्विदग्धो नरः)

**उच्छलद्ध्वनयत्यब्धिः नदीनादो मधुकलम्।**
**क्षपयति स्रवदम्भोः बिन्दुः गर्वे यथा नरः॥[66]**

इह महाप्राणस्य प्रयोगः अनुप्रासरचना च मनोहराऽखिला ; क्षपयति[67] प्रयोगेण काव्ये सुपाकः।

अथ कथालक्षणोपेतं[68] दुर्जननिन्दायां शब्दकर्मणधातूनां प्रयोगः–

(दुर्जनाचारः)

**रेटते युक्तिदं किञ्चिद् भाषते न सुभाषितम्।**
**सः मूढो नेदते चान्यान्निसर्गरीदृशःखले॥**
**अपृष्टो भाषते सोऽयं पृच्छायां रेटतेऽधिकम्।**
**नित्यं नन्दति नेदते हालाहलं विषावृतः॥[69](युग्मकम्[70])**

इति युग्मकेन रेटष्ट[71] णेदष्ट[72] धात्वोः प्रयोगाः , नित्यं नन्दति नेदते–इत्यत्र चानुप्रासरचना मधुरा।

भावभूतिभिः भूषितं बाल्यं स्मरति–

(बाल्यं स्मरामि मुहुः)

**स्मारं स्मारं विगतदिवसाञ्चेतराकर्षास्तान्**
**वीराणाञ्च प्रथितसुकथां चीयते स्म क्षपायाम्।**
**माता नीतिग्रथितनिपदां बुन्दते स्म प्रियाणाम्**
**यातं वृत्तं व्यथितहृदयैः काम्यमानेऽपि दूरम्॥[73]**

अत्र चायष्ट[74] उबुन्दिर्[75] चेत्येतयोः धात्वोः प्रयोगेण मातुस्स्मरति[76]।

(मूर्खस्यापरिमितता)

बुक्कते रस्यते शुनाऽऽसंदेहे ह्रस्यते बत!
रायति घर्घरामिश्रः स्त्यायताऽपि प्रतिध्वनिम्॥[77]

(भयानको रसःस्वरः)

**उत्तुंगे गिरिगर्भवासमुखरैर्दीर्घैर्वितानैर्दृशा**
**साक्रोशं निजबन्धुभिस्सह रताः पक्षैः मिथः तोदने।**
**आदौ स्त्यायति झर्झता प्रतिरवः श्रोतुं भवेद्दुष्करः**
**निष्ट्यायन्ति परस्परं विघटिते घोरो ध्वनिः भीषणः॥[78]**

इह बुक्कते[79] रस्यते[80] ह्रस्यते[81] रायति[82] स्त्यायता[83] इति भिन्नरूपप्रयोगैः युक्तप्रयोगः।

(खलोऽभद्रमुख एव)

**ह्वयते भाषते किञ्चित् झर्झति जर्जति प्रियम्।**
**रायति मेशति क्षिप्रं ष्ठ्वा इव वर्त्तते खलः॥**

दुर्जनलक्षणं विशदेन ख्यातः– झर्झति[84] जर्जति[85] रायति[86] मेशति[87] च प्रयोगैः ।

साक्षराऽपि भवन्ति भ्रान्तौ दर्शितुं यत्नः–

(साक्षराः भ्रान्तावपि)

**दुःखार्त्तः स्विदति क्षुधः प्रतिपदं श्रव्यं जिगातीव च**
**अज्ञानात्स्विदति प्रकाशविरते स्थूणा समं पूरुज्ञः।**
**प्रायेणाविकलेन्द्रियैः कतिपयैश्शब्दाः वृथा वाश्यते**
**यज्ञस्पष्टचवर्गयोगरचना गान्तस्पदे वाश्यते॥[88]**

(अहो! भक्तैस्स्तुतो हरिः)

**नित्यं प्रातरुषर्बुधैर्बहुविधैर्दिव्यैः पदैर्दीव्यति**
**नित्यानन्दनिसर्गरम्यरुचिरं क्नूनाति दुःखं स्वकम्।**
**नित्योऽसि क्षणिकेन केन विधिना साक्षात्कृतस्त्वं वद!**
**नित्यं कष्टविदीर्णवाग्भिरनिशं भक्तैस्स्तुतश्शंकरः॥[89]**

(नालीकं गोपयितुं शक्यम्)

**दीव्यति दीव्यति प्रोक्ते श्लाघितौ तर्जिताबुभौ।**
**कृतवेषार्चकस्याक्षैः पतितैर्दीव्यति स्फुटम्॥[90]**

इह नित्यं पदस्य रचना रूचिरा प्रतिपंक्त्यारंभे परश्च दीव्यति[91] दीव्यति[92] प्रयोगाभ्यां स्तुत्यर्थं द्यूतकर्मविहीनं द्योतयितुं यत्नोऽस्ति विहितः। 'क्नूञ्–क्नूनाति[93]' प्रयोग अपि दुःखं द्योतने युक्तः।

इह रूचिरेण प्रयोगेण प्रत्यक्षीकर्तुं शक्तोऽस्ति विषयः ,दीव्यति[94]–दीव्यति[95] प्रयोगयोः निहितार्थौ वर्णितौ प्राञ्जलभाषया।

(प्रियया तर्जितो नायकः)

**स्कन्धे चिह्नक्षतनखकृतं लक्षितस्यास्य वध्वा**
**पृष्टे व्याजैरनुमितधिया कुन्द्रयन्तं सकोपम्।**
**प्रत्यागत्य प्रियविरहजं वेदयिष्येति प्रोच्य**
**साशाः धृष्टस्तवमतिहतैः वञ्चितास्मि क्रमेण॥[96]**

इह धृष्टनायको[97] वर्णितः तदत्र कुन्द्रयन्तं(कुद्रि)[98] प्रयोगेणार्थस्य चमत्कारः प्रशंस्यः।

(मधुररसे माधवे धरा )

**ग्राम्यारण्यनिवासवृत्तिभिरदो गोपालको मन्दते**
**प्रातः वन्यविहारकौतुकमना: जागर्त्ति शीघ्रं गृहे।**
**क्षिप्रं गोपयताऽन्यबालनिकरैस्सम्मोहितै आगते**
**श्रीकृष्णो गदयन्नभिन्नरसितै रागे धरा माथुरा॥[99]**

अथ बालचरितं गोपयता (गुप)[100] गदयन्(गद)[101] धातूभ्यां ब्रूते मन्ये 'गोपालः' इति गकारपदेनाकारितं रुपसाम्येन धात्वोरनयोः प्रयोगः।

(कीर्त्तिर्यस्य सो वर्तते)

**परेभ्यो जीवितं येषां गोपयन्ति परे हिते।**
**कीर्त्तिभिः पश्य लोकान्ताँगदयन्ति जनाः कृतम्॥[102]**

इह गोपालशब्दस्य अर्थ स्फुटो भवति ।

ये प्रयोगाः धातुक्रमेण प्रदर्शिताः तेषां प्रयोगैस्ते भाषायामनिशं वर्तमानाः कृतप्रयोगविषयारासन्तामिति मनसाऽवधाय ईज्ञ्यत्नः कृतः। यतः 'अप्रयोगः प्रयोगान्यत्वात्'[103] इति वचनेन भाज्ञायां ये धातवः कालक्रमेण विलोपिताः भविष्यन्तीति कम्पितहृदा एष स्वरचनाऽमधुरधृष्टयत्नः पुरतः। यत्र क्वापीषदपि रसे रसाभासे भावे भावाभासे चाल्पता सा चपलतामतिः मम। तत्परिष्काराय संसूच्य मामनुगृह्णन्तु कृपया।

**(Footnotes)**

1 काव्यादर्श श्लो01
2 महाभाष्य पस्पशा0 पृ.13
3 सा.द. परि.2 पृ.26
4 सामान्येन गणनम् तेन पार्थक्यमपि शक्यते गणनायाम्
5 निरूक्त अ.2 पृ1 टिप्पणी
7 अष्टा.1.4.11
8 स्वोपज्ञम्
9 पा.धातुपाठ भ्वादिगणः धातु 10
10 पा.धातुपाठ अदादिगणः धातु 53
11 पा.धातुपाठ भ्वादिगणः धातु 12
12 पा.धातुपाठ भ्वादिगणः धातु 42
13 पा.धातुपाठ भ्वादिगणः धातु 21
14 पा.धातुपाठ भ्वादिगणः धातु 22
15 स्वोपज्ञम्
16 पा.धातुपाठ भ्वादिगणः धातु 146
17 साहित्य.द.परि.10 का.3
18 स्वोपज्ञम्
19 पा.धातुपाठ भ्वादिगणः धातु 172
20 पा.धातुपाठ भ्वादिगणः धातु 285
21 पा.धातुपाठ भ्वादिगणः धातु 299
22 स्वोपज्ञम्
23 पा.धातुपाठ भ्वादिगणः धातु 172
24 पा.धातुपाठ भ्वादिगणः धातु 735
25 पा.धातुपाठ भ्वादिगणः धातु 42
26 पा.धातुपाठ अदादिगणः धातु 53
27 स्वोपज्ञम्
28 स्वोपज्ञम्
29 पा.धातुपाठ भ्वादिगणः धातु 80
30 स्वोपज्ञम्
31 पा.धातुपाठ भ्वादिगणः धातु 285
32 पा.धातुपाठ भ्वादिगणः धातु 285
33 स्वोपज्ञम्
34 वर्णोच्चारणशिक्षा प्रक.4 पृ. 17
35 स्वोपज्ञम्
36 साहित्य.द. परि. 10 कारि. 51
37 स्वोपज्ञम्
38 पा.धातुपाठ भ्वादिगणः धातु 326
39 पा.धातुपाठ चुरादि. 183
40 स्वोपज्ञम्
41 पा.धातुपाठ भ्वादिगणः
42 पा.धातुपाठ भ्वादिगणः
43 पा.धातुपाठ भ्वादिगणः
44 साहित्य0द. परि. 10 कारि. 3
45 स्वोपज्ञम्
46 पा.धातुपाठ भ्वादिगणः धातु 416
47 पा.धातुपाठ भ्वादिगणः धातु 426
48 साहित्य0द. परि. 10 कारि. 3
49 पा.धातुपाठ भ्वादिगणः धातु 416
50 स्वोपज्ञम्
51 स्वोपज्ञम्
52 पा.धातुपाठ चुरादि.धातु 426
53 स्वोपज्ञम्
54 स्वोपज्ञम्
55 पा.धातुपाठ चुरादि.धातु 223
56 तदेव
57 तदेव
58 साहित्य.द. परि. 10 कारि. 51
59 स्वोपज्ञम्
60 स्वोपज्ञम्
61 पा.धातुपाठ भ्वादि.धातु 303
62 पा.धातुपाठ चुरादि.धातु 314
63 पा.धातुपाठ भ्वादि.धातु 556
64 पा.धातुपाठ भ्वादि.धातु 260
65 स्वोपज्ञम्
66 स्वोपज्ञम्
67 पा.धातुपाठ भ्वादि.धातु 556
68 साहि.द. परि.6 का.333
69 स्वोपज्ञम्
70 साहि.द. परि.6 का.314
71 पा.धातुपाठ भ्वादि.धातु 606
72 पा.धातुपाठ भ्वादि.धातु 612
73 स्वोपज्ञम्
74 पा.धातुपाठ भ्वादि.धातु 620
75 पा.धातुपाठ भ्वादि.धातु 615
76 अष्टा. 2.3.63
77 स्वोपज्ञम्
78 स्वोपज्ञम्
79 पा.धातुपाठ भ्वादि.धातु 84
80 पा.धातुपाठ भ्वादि.धातु 649
81 तदेव
82 पा.धातुपाठ भ्वादि.धातु 649
83 पा.धातुपाठ भ्वादि.धातु 650
84 पा.धातुपाठ भ्वादि.धातु 475
85 तदेव
86 पा.धातुपाठ भ्वादि.धातु 649
87 पा.धातुपाठ भ्वादि.धातु 479
88 स्वोपज्ञम्
89 स्वोपज्ञम्
90 स्वोपज्ञम्
91 पा.धातुपाठ दिवादि.धातु 1
92 पा.धातुपाठ दिवादि.धातु 1
93 पा.धातुपाठ क्र्यादि.धातु 8
94 पा.धातुपाठ दिवादि.धातु 1
95 पा.धातुपाठ दिवादि.धातु 1
96 स्वोपज्ञम्
97 साहि.द. परि. 3 का.35
98 पा.धातुपाठ चुरादि.धातु 6
99 स्वोपज्ञम्
100 पा.धातुपाठ चुरादि.धातु 223
101 पा.धातुपाठ भ्वादि.धातु 42
102 स्वोपज्ञम्
103 महाभाष्यम् पस्पशा. पृ.23

# 'मनोगतम्' – 41

## प्रसारण-तिथिः – 25.02.2018

### – भाषान्तर-कर्ता – बलदेवानन्द-सागरः



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः, नमस्कारः।

अद्य प्रारम्भादेव 'मन की बात'-प्रसारणं दूरभाषाकारणात: एव कुर्मः। (दूरभाषाकारणा )

आदरणीय ! प्रधानमन्त्रि-महोदय !! अहं कोमल-त्रिपाठी, मेरठतः वदामि... अष्टाविंशति-दिनाङ्के 'national science day'- इति राष्ट्रिय-विज्ञान-दिनं वर्तते... भारतस्य प्रगतिः विकासश्च, पूर्ण-रूपेण विज्ञानेन सम्बद्धौ स्तः... यावन्तम् अत्र वयं नवाचारम् अनुसन्धानञ्च करिष्यामः, तावन्तमेव अग्रेसरिष्यामः तथा च समृद्धिम् अवाप्स्यामः... किं भवान् अस्मदीयान् यूनः प्रोत्साहयितुं काञ्चन तादृशान् शब्दान् कथयिष्यति येन हि ते वैज्ञानिक-पद्धत्या स्वीयां विचार-सरणीम् विवर्धयेयुः तथा चास्माकं राष्ट्रमपि अग्रेसारयितुं शक्नुयुः...धन्यवादः। भवत्याः दूरभाषाकारणायाः कृते भूरि-भूरि धन्यवादः। विज्ञानमधिकृत्य मम युव-सहचराः माम् अनेकान् प्रश्नानपृच्छन्, ते किमपि किमपि सततं मां लिखन्ति। वयम् अवलोकयामः यत् समुद्रस्य वर्णः नीलः दृश्यते परञ्च वयं स्वीय-दैनिक-जीवनस्य अनुभवैः जानीमः यज्जलस्य न कश्चन वर्णो भवति । किं कदाचिद् अस्माभिः विचारितं यत् नद्याः, समुद्रस्य वा जलं वार्णिकं कथं भवति ? अयमेव प्रश्नः विंशत्युत्तर-एकोनविंशति-शत-तमस्य [1920] दशके एकस्य युवकस्य मनसि समुत्पन्नः। अमुना एव प्रश्नेन आधुनिक-भारतस्य अनन्यतमः महान् वैज्ञानिकः समुत्पादितः। यदा वयं विज्ञान-विषयिणीं चर्चां कुर्मः, तदा सर्व-प्रथमं भारत-रत्नं सर्-सी.वी.रमणं स्मरामः। सः light scattering – इति प्रकाशस्य प्रकीर्णन-क्षेत्रे उत्कृष्ट-कार्यम् अकरोत्, तदर्थम् असौ नोबल-पुरस्कारेण सभाजितः। तस्य अन्यतमम् अन्वेषणं 'Raman effect'-इति नाम्ना सुख्यात- मस्ति। वयं प्रतिवर्षं फेब्रुआरि-मासे अष्टाविंशतौ तिथौ 'National Science Day'-राष्ट्रिय-विज्ञान-दिनम् आयोजयामः यतो हि एवं निगद्यते यत् अस्मिन्नेव दिने सः light- scattering-इति प्रकाश-प्रकीर्णन-विषयम् अन्विष्टवान्, यदर्थमसौ नोबल-पुरस्कारेण सभाजितः। देशोऽह्ययं विज्ञान-क्षेत्रे बहून् महतः वैज्ञानिकान् अजनयत्। एकतः महतां गणितज्ञ-बोधायन-भास्कर-ब्रह्मगुप्त-आर्यभट्ट-सदृशानां वैज्ञानिकानां दीर्घा परम्परा प्रावर्तत, अपरतश्च चिकित्सा-क्षेत्रे सुश्रुत-चरकौ अस्माकं गौरवास्पदं भजेते। सर्-जगदीश-चन्द्र-बोसः हरगोविन्द-खुरानातः सत्येन्द्र-नाथ-बोस-सदृशानांवैज्ञानिकानां दीर्घा पंक्तिः भारतस्य गौरवं सततं विवर्धयति। सत्येन्द्र-नाथ-बोसस्य नाम्ना तु 'Boson'- इति 'famous particle'- सुख्यात-कणिकायाः नामकरणमपि विहितम्। नातिचिरमहं मुम्बय्यां Wadhwani Institute for Artificial Intelligence-इति संस्थानस्य उद्घाटन-कार्यक्रमस्यसौभाग्यम् अलभम् । विज्ञान-क्षेत्रे ये चमत्काराः भूयन्ते, तेषाम् अवगमनम् अतितरां रोचकं वर्तते। Artificial Intelligence - इति कृत्रिम-प्रज्ञायाः माध्यमेन Robots, Bots- चेति कृत्रिम-मानवानां specific task- चेति विशिष्ट-कर्म-कुशलानां यन्त्राणां च निर्माणे साहाय्यम् अवाप्यते । अद्यत्वे यन्त्राणि self-learning - इति स्वतः एव स्व-प्रज्ञां दक्षतरां कुर्वन्ति । अयं प्रविधिः निर्धनानां, वञ्चितानाम् अपेक्षावताञ्च जीवनानि सरलीकर्तुं, प्रयोक्तुं शक्यते । कृत्रिम-प्रज्ञायाः तस्मिन् कार्यक्रमे अहं वैज्ञानिक-समुदायाय साग्रहं न्यवेदयं यत् दिव्याङ्गानां भगिनी-भ्रातॄणां जीवनानि सरलीकर्तुं केन प्रकारेण कृत्रिम-प्रज्ञातः साहाय्यम् अवाप्तुं शक्यते ? इति कृत्वा नूनं ते प्रयतेरन्, किं वयं कृत्रिम-प्रज्ञायाः माध्यमेन प्राकृतिक-आपदां विषयेऽह्यपि समधिकम् अनुमातुं शक्नुमः ? कृषकाणां शस्योत्पादन-विषयेऽह्यपि किञ्चित् साहाय्यं कर्तुं शक्नुमो वा ? किं कृत्रिम-प्रज्ञा स्वास्थ्य-सेवानाम् अभिगमनं सरलतरं विधातुम् आधुनिक-पद्धत्या च रोगाणाम् उपचारार्थं सहायिनी भवितुमर्हति ?

विगतेषु दिनेषु इजराइल-प्रधानमन्त्रिणा साकमहं गुजराते,अमदाबादे 'I Create'- इति कार्यक्रमस्योद्घाटनाय अवसरं लब्धवान् । तत्राहं सूचितः यत् कश्चन अन्यतमो युवा, तादृशमेकं 'digitalinstrument' - इति अङ्कीयोपकरणं विकासितवान् यस्य साहाय्येन कश्चन वक्तुम् अक्षमो जनः तस्योपकरण-माध्यमेन स्वीयं हार्दं लिखन्नेव तद् ध्वनिरूपेण परिणमते, तथा च भवान् तेन सम्भाषितुं तथैव शक्नोति यथा केनचिद् भाषण-क्षमेण साकं कर्तुं पारयति। अवगच्छामि यत् Artificial Intelligence - इति कृत्रिम-प्रज्ञां वयम् अनेकासु विधासु समुपयोक्तुं प्रभवामः।

Science and Technology - विज्ञानं प्रविधिश्च value neutral - इति मूल्य-निरपेक्षौ भवतः। अनयोः मूल्यं स्वतः नैव प्रोद्भवति। किञ्चिदपि यन्त्रं तथैव कार्याणि करिष्यति यथा वयम् अभिलषामः। परञ्च इदं हि अस्मत्सु निर्भरं यत् वयं यन्त्रैः किं किं कारयितुं वाञ्छामः। अत्र हि मानवीयम् उद्देश्यं महत्वपूर्णं भवति । मानव-मात्रस्य कल्याणार्थं विज्ञानस्य समुपयोगः ! मानव-जीवनस्य सर्वोच्चं शिखरं संस्प्रष्टुंविज्ञानस्य समुपयोगः !!

Light Bulb - विद्युत्-कन्दस्य आविष्कारकः Thomas Alva Edison निज-वैज्ञानिक-प्रयोगेषु नैकवारम् असफलः अवर्तत7 एकदा विषयेऽह्यस्मिन् असौ पृष्टः तदासौ उदतरत् - 'मया Light Bulb - इति विद्युत्-कन्दस्य अनुत्पादनस्य दश-सहस्रं पद्धतयः अन्विष्टाः', अर्थात् Edison स्वीयाः असफलताः अपि निजशक्ति-रूपेण अङ्गीकृतवान्। संयोगाद् इदम् अस्मदीयं सौभाग्यं यत् अद्याहं महर्षि-अरविन्दस्य कर्मभूमौ 'Auroville'- इत्यत्रास्मि । सः क्रान्तिकारि-रूपेण ब्रिटेन्-शासनं समाह्वयत्, तद् विरुद्ध्य संघर्षम् अकरोत्, तेषां शासने अनेकविधमाशङ्कितवान्। एवं हि सः महर्षि-रूपेण, जीवनस्य प्रत्येकमपि प्रश्नानाम्उत्तराणि अन्विष्य मानवतायाः मार्ग-प्रदर्शनमकरोत्।

सत्यं ज्ञातुं पौनःपुनिकी जिज्ञासा हि सुतरां महत्वपूर्णा अस्ति। वैज्ञानिकान्वेषणस्य कृतेऽह्यपि वास्तविकी प्रेरणा सैवास्ति। कथम्, किम्, केन प्रकारेण च इत्यादि-प्रश्नानाम् उत्तराणि नैव समुपलभ्यन्ते, तावत्-पर्यन्तं विश्रमेण नैव स्थातव्यम्। National Science Day - इति राष्ट्रिय-विज्ञान-दिनावसरे अस्मदीयान् वैज्ञानिकान्, विज्ञान-सम्बद्धान् सर्वान् जनान् चाहं वर्धापयामि। अस्मदीया युव-सन्ततिः,सत्य-ज्ञानयोः अन्वेषणार्थं सततं प्रेरिता भवेत्, विज्ञानस्य साहाय्येन समाज-सेवायै अनारतंसम्प्रेरिता स्यात्, एतदर्थं मम भूरिशो मङ्गल-कामनाः विलसन्तुतराम्।

मित्राणि, सङ्कट-काले safety, disaster - चेत्यादि-सुरक्षा-प्रबन्धन-विषयकाः अनेके सन्देशाः नैकवारं मां प्रति प्रेष्यन्ते, जनाः मां किमपि-किमपि विविधं लिखन्ति एव। पुणेतः श्रीमान् रवीन्द्र-सिंहः NarendraModi mobile App - इत्यत्र प्रेषितायां निज-टिप्पण्यां occupational safety - इति वृत्ति-विषयिणीं चर्चाम् अकरोत्। सः अलिखत् यत् अस्माकं देशे factories-constructions sites - चेति निर्माणी-निर्माण-स्थलेषु safety standards - सुरक्षा-मानकानि तावन्ति समीचीनानि नैव वर्तन्ते । आगामिनि मार्च-मासे चतुर्थे दिने भारतस्य National Safety Day- इति राष्ट्रिय-सुरक्षा-दिवसोऽह्यस्ति, तर्हि प्रधानमन्त्री स्वीये 'मन की बात' - प्रसारणे सुरक्षा-विषये नूनं सूचयेत् येन जनेषु सुरक्षा-विषयिणी जागर्तिः विवर्धेत।

यदा वयं public safety - इति सार्वजनिक-सुरक्षां चिन्तयामः तदा तथ्य-द्वयम् अतितरां महत्वपूर्णं भवति - प्रथमंpro-activeness - अर्थात् पूर्वतः एव सक्रियत्वं द्वितीय @preparedness -अर्थात् सन्नद्धता । सुरक्षा द्विप्रकारिका भवति - एका हि सा, या आपत्काले आवश्यकी - safety during disasters अपरा च, सा या दैनिक-जीवने आवश्यकी - safety in everyday life। यदि वयं दैनिक-जीवने सुरक्षा-विषये अवहिताः नैव स्मः, तामधिगन्तुं नैव शक्नुमश्चेत्, तदा आपदवसरे अस्याः उपलब्धता दुष्करा भवति। वयं नैक-वारं मार्गेषु स्थापितानि सूचना-फलकानि पठामः येषु लिखितं भवति यत्-

- 'अवधानता नास्ति चेत् -दुर्घटना भविष्यति',
- 'एका त्रुटिः हानिमापादयति, स्मितं सुखञ्च छिनत्ति',
- 'एतावत्त्वरया नैव संसारं त्यज, सुरक्षया सन्नद्धो भव'
- 'सुरक्षां न किञ्चिदपि अवहेलय,नो चेत् जीवनं विनङ्क्ष्यति'

इतः परम् अस्माकं जीवने एतेषां वाक्यानां न कदाचिदपि उपयोगो भवति ' प्राकृतिकापदो यदि त्यज्यन्ते चेत्, तदा अस्मदीये जीवने दुर्घटनानाम् अधिसंख्यं,अस्माकं कयाचिदपि त्रुट्या एव परिणमते ' यदि वयं सावधानाः भवेम,आवश्यक-नियमान् अनुसरेम चेत्, वयं स्वीयं जीवनन्तु रक्षितुं शक्नुमः एव, परञ्च अस्मदीयं समाजमपि विकरालाभ्यः दुर्घटनाभ्यो रक्षितुं शक्नुमः । कदाचित्तु अस्माभिः दृष्टमपि यत् कार्य-स्थलेषु बहूनि सुरक्षा-सूत्राणि लिखितानि भवन्ति परञ्च प्रायेण पश्यामः यदेतानि सूत्राणि न मनागपि अनुस्रियन्ते। ममायम् आग्रहः यत् याः महानगर-पालिकाः, नगर-पालिकाः च अग्नि-शमन-वाहिनीं धारयन्ति, ताभिः प्रतिसप्ताहं वा प्रतिमासम् एकवारं विभिन्नेषु विद्यालयेषु गत्वा विद्यालयीयानां बालानां पुरतो विकत्थानाभ्यासः प्रदर्शनीयः। अमुना अभ्यासेन लाभ-द्वयं सेत्स्यति - अग्निशमन-वाहिनी अपि अवधानार्थम् अभ्यस्ता भविता, नूतना सन्ततिः अपि शिक्षिता भविष्यति तथा चैतदर्थं नातिरिक्तो व्ययोऽह्यपि वर्तिता -एवं हि, अभ्यासोऽह्ययं शिक्षा-क्रमत्वेन प्रवर्तिष्यते, तथा च, एतदर्थम् अहं सर्वदैव साग्रहं वदामि। आपत्-सन्दर्भे तु इदमेव चिन्तनीयं यत् भारतं भौगोलिक-दृष्ट्या जलवायु-दृष्ट्या च, विविधता-सम्भरितो देशोऽह्यस्ति। अमुना विकत्थानाभ्यासेन, देशेन अनेकाः प्राकृतिकाः मानव-निर्मिताश्च आपदः सम्मुखी-कृताः यासु रासायनिक्यः औद्योगि- क्यश्च दुर्घटनाः अन्यतमाः सन्ति। अद्य National Disaster Management Authority - अर्थात् NDMA - राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणं देशे आपदां प्रबन्धनानि सन्नयति । भवतु नाम कुत्रचिद् भूकम्पो वा जलोपप्लवः, आहोस्वित् सामुद्रिकः झञ्झावातो वा भूस्खलनम् - एतादृशीषु विभिन्नासु आपत्सु, सुरक्षा-साहाय्य-कार्यार्थं राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणं त्वरया सम्प्राप्नोति । एतैः दिशा-निर्देश-सूत्राणि प्रसारितानि सन्ति, युगपदेव, ते capacity building - इति क्षमता-वर्धनार्थं सततं प्रशिक्षण-कार्याणि अपि कुर्वन्ति । जलोपप्लव-सामुद्रिक- झञ्झावातादि-युतेषु जनपदेषु स्वयंसेविनां प्रशिक्षणाय अपि 'आपदा-मित्रम्'-नाम्ना प्राथमिकाः प्रयासाः विहिताः । प्रशिक्षणस्य जागरूकतायाः चात्र महत्वपूर्णा भूमिकास्ति।

इतः वर्ष-द्वयं वर्ष-त्रयं वा पूर्वं heat wave - घर्माघातेन प्रतिवर्षं सहस्रशो जनाः विगत-प्राणाः जायन्ते स्म। ततः परं राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणं घर्माघातानां प्रबन्धनार्थं कार्यशालाः आयोजितवत्, जनेषु जागर्तिं प्रसारयितुम् अभियानञ्च प्रावर्तयत्। ऋतु-विज्ञान-विभागः समीचीनं पूर्वानुमानं व्यदधात् । सर्वेषां सहभागितायाः कारणात् सुपरिणामः अवाप्तः। विगते वर्षे घर्माघातेन म्रियमाणानां संख्या अप्रत्याशितरूपेण अपचीय प्रायेण विंशत्यधिक-द्विशत-मिता [220] सञ्जाता। अनेन ज्ञायते यत् वयं यदि सुरक्षायै प्राथमिकतां दद्मश्चेत्,नूनं वयं सुरक्षामवाप्तुं शक्नुमः। समाजे एतादृक्-कार्य-कर्तारः अगणिताः जनाः स्युः, सामाजिक-संघटनं भवेत्, जागरूकाः नागरिकाः भवेयुः - ये हि कुत्रचिदपि आपत्काले त्वरया सुरक्षा-साहाय्य-कार्याणि विधातुं संलग्नाः भवन्ति, तादृशान् अहं हृदयेन प्रशंसामि । अपि चैतादृशानां अज्ञात-नायकानां संख्या कथमपि न्यूना नास्ति । अस्माकं Fire and Rescue Services, National Disaster Response Forces, सशस्त्र-सेनाः, अर्ध-सैन्य-बलानि, चैते संकट-काले साहाय्यार्थं द्रुतं प्राप्यमाणाः वीराः योद्धारः निज-जीवितानि अविगणय्य जनानां साहाय्यं कुर्वन्ति। NCC,

शेषभागः सप्तमपुटे

षष्टमपुटस्य शेषभागः

## 'मनोगतम्' – 41

Scouts - सदृशानि संघटनानि अपि एतानि कार्याणि कुर्वन्ति, युगपदेव प्रशिक्षणमपि लभन्ते। विगतेषु दिनेषु अस्माभिः अयमपि प्रयासः आरब्धः यज्जगतो देशाः यथा joint military exercise - इति संयुक्त-सैन्याभ्यासं कुर्वन्ति तथैव कथन्न एते देशाः सम्भूय Disaster Management -चेति आपत्-प्रबन्धनार्थं संयुक्ताभ्यासं न कुर्युः? भारतेन विषयोऽयं सन्नीतः –BIMSTEC, बांग्लादेश, भारत, म्यांमार, श्रीलंका, थाईलैंड, भूटान-नेपाल-प्रभृतीनां देशानां joint disasters management exercise - इति संयुक्तापत-प्रबन्धनाभ्यासः अपि कारितः, अयं हि प्रप्रथमः बृहत्-मानवीय-प्रयोगः आसीत्। अस्माभिः risk conscious society - इति सङ्कटावहित-समाजेन भाव्यम्। अस्माकं संस्कृतौ वयं मूल्य-रक्षण-विषये तु बहुधा विचारयामः, परञ्च अस्माभिः values of safety - सुरक्षा-मूल्यमपि सम्यक्तया अवगन्तव्यम्। स्वीय-जीवनस्य अभिन्नाङ्गत्वेन मूल्यमिदं स्वीकरणीयम्। यदि वयं स्वभावतया अवहिताः नैव स्मः तथा च, विमान-यात्रावसरे प्रदर्श्यमानानां सुरक्षोपायानां विषये एकाग्रतया नैव शृण्मः अवलोकयामश्चेत्, सुरक्षा-विषयमङ्गीकर्तुं नैव प्रभवामः। एवं हि जीवनस्य प्रत्येकमपि क्षेत्रे अस्माकीनोह्यनुभवो भवति। अस्माभिः नैवं विचारणीयं यत् सुरक्षैषा कस्यचिद् अपरस्य कृते वर्तते, यदि वयं सर्वे स्व-स्व-सुरक्षा-विषये अवहिताः भवेम चेत्, समाजस्य सुरक्षाभावोह्यपि अत्र अन्तर्हितो जायते।

मम प्रियाः देशवासिनः, ऐषमः महाय-व्यय-पत्रके 'स्वच्छ-भारत'-कार्यक्रमान्तर्गतं ग्रामेभ्यः जैव-वाति-माध्यमेन waste to wealth - अवकारात् समृद्धिं प्रति, तथा च, waste to energy - अवकारात् ऊर्जां प्रति रचनात्मक-कार्याणि सबलं प्रतिपादितानि सन्ति। एतदर्थं प्राथमिकतया प्रयतितम्, तथाच, 'गोबर-धन' इति नाम्ना कार्यक्रमोऽयं अभिहितः, 'GOBAR-Dhan' - अर्थात् Galvanizing Organic Bio-Agro Resources। अस्याः 'GOBAR-Dhan' -योजनायाः उद्देश्यमस्ति, ग्रामाणां शुद्धीकरणम्, तथा च, पशूनां पुरीषाणि, क्षेत्राणां घट्टान् अपशिष्टान् च पदार्थान् COMPOST-BIO-GAS - चेति उर्वरक-जैव-वाति-रूपेण परिवर्त्य, तेभ्यः धनस्य ऊर्जाया: च उत्पादनम्। भारते पशूनां संख्या हि अशेष-जगति सर्वाधिका अर्थात् प्रायेण त्रिंशत्-कोटि-मिता वर्तते, अपि च, पशु-पुरीषोत्पादनं प्रतिदिनं प्रायेण त्रिंशल्लक्ष-टन-मितं भवति। केचन यूरोपीय-देशाः चीन-देशश्च पशु-पुरीषाणि अन्यान् च जैविकापशिष्ट-पदार्थान् उपयोज्य ऊर्जाम् उत्पादयन्ति परञ्च भारते अस्य पूर्ण-क्षमता नैवोपयोज्यते स्म। 'स्वच्छ भारत मिशन ग्रामीण'- इति योजनायाः अन्तर्गतं सम्प्रति वयं अस्यां दिशि अग्रेसरामः।

पशूनां पुरीषाणि, कृषितः निष्काश्यमानोह्यवकरः, पाकशालायाः अपस्करः, चैतानि सर्वाणि उपयोज्य जैव-वात्याधृताम् ऊर्जां विनिर्मातुंलक्ष्यं निर्धारितमस्ति। 'गोबर-धन-योजनायाः' अन्तर्गतं ग्रामीण-भारतस्य कृषकाः, भगिन्यः, भ्रातरश्च प्रोत्साहयिष्यन्ते। ते पशु-पुरीषम् अवकरञ्च केवलम् अपशिष्टमिति नैव, अपि तु आयस्रोतस्त्वेन अभिमन्येरन्। 'गोबर- धन-योजनया' ग्रामीण-क्षेत्राणि अनेकविधानि लाभानि अवाप्स्यन्ति। ग्रामाणां स्वच्छता-सन्धारणाय साहाय्यम् अवाप्स्यते। पशूनाम् आरोग्यं भद्रतरं भविता तथा च, उत्पादकता विवर्धिता। जैव-वात्या भोजन-पाकस्य प्रकाशस्य च कृते ऊर्जा-विषयिणी आत्मनिर्भरता एधिता। कृषकाः पशुपालकाः च आय-विवर्धने साहाय्यम् अवाप्स्यन्ति। Waste collection, transportation, - चेति अवकर-संचयन-परिवहनयोः जैववाति-विक्रयस्य च कृते नूतनाः वृत्त्यवसराः प्राप्स्यन्ते। 'गोबर-धन-योजनायाः' सुचारु-व्यवस्थापनार्थम् एकः online इति सद्यस्क-विक्रय-मञ्चः अपि विनिर्मास्यते यो हि कृषकान् विक्रेतृभिः सार्धं संयोजयिष्यति येन कृषकाः पशु-पुरीषस्य कृषेः अवकरस्य च समुचितं मूल्यम् अवाप्नुयुः। अहं उद्यमिनः, विशेषेण च ग्रामीण-भारते निवसतीः मम भगिनीः साग्रहं निवेदयामि यत् भवत्यः अग्रे आयान्तु। Self Help Group - स्वयं-सहायि-समूहान् निर्मीय, सहकारिसमितीश्च विरचय्य अस्य अवसरस्य पूर्ण-लाभंप्राप्नुयुः। clean energy and green jobs- इत्यान्दोलनस्य सहभागित्वार्थम् अहं भवतो भवत्यश्च आमन्त्रयामि। स्वीये ग्रामे अवकरं धनागमत्वेन परिवर्तयितुं पशु-पुरीषात् गोबर-धनमर्जितुं च भवन्तः प्रयतेरन्।

मम प्रियाः देशवासिनः, अद्य-पर्यन्तं वयं संगीत-समारोह-खाद्य-समारोह-चलचित्र-समारोह-प्रभृति-नाना-समारोह-विषये शृण्वन्तः आस्म। परञ्च छत्तीसगढे रायपुरे अनुपमं प्रयत्य राज्यस्य प्रप्रथमः 'कचरा-महोत्सव'- इति अवकर-महोत्सवःआयोजितः। रायपुर नगर निगम द्वारा आयोजितस्य अस्य महोत्सवस्य उद्देश्यमासीत् - स्वच्छता-विषयिणी जागरूकता। नगरस्य अवकरस्य रचनात्मक-समुपयोगस्य अवकरस्य पुनःप्रयोगस्य च विभिन्न-पद्धतीनां विषये जागरूकता-विवर्धनम्। अस्य महोत्सवस्य अवसरे नाना कार्याणि विहितानि येषु छात्राः आबाल-वृद्धाश्चसहभागित्वमावहन्। रायपुरेण प्रेरितेषु अन्येषु अपि जनपदेषु पृथक्-पृथक्-प्रकारकाः अवकरोत्सवाः संपन्नाः। विशेषेण विद्यालयीयाः बालाः यैः समुत्साहेन सहभागित्वं निर्व्यूढम्, तद्धि अद्भुतमासीत्।Waste management- इति अवकर-प्रबन्धनस्य स्वच्छतायाश्च महत्वं येन अभिनव-प्रकारेण महोत्सवेह्यस्मिन् प्रदर्शितम्, तदर्थम्, रायपुर नगर निगमाय,अशेषस्य छत्तीसगढ़स्य नागरिकान् अत्रत्य-प्रशासनाय अधिकारिभ्यश्च भूरिशो वर्धापनानि।

प्रतिवर्षं मार्च-मासे अष्टमे दिने 'अंतर्राष्ट्रिय-महिला-दिवसः' आमान्यते। देशे जगति अन्यत्र च एतद्-विषयकाः अनेके कार्यक्रमाः आयोज्यन्ते।अस्मिन् दिने देशे 'नारी शक्ति पुरस्कारैः' एतादृश्यः महिलाः सम्मान्यन्ते याः विगते काले भिन्न-भिन्न-क्षेत्रेषु अनुकरणीय-कार्यमनुष्ठितवत्यः। साम्प्रतं देशोह्यं महिला-विकासात् परं woman-lead development- इति महिला-सन्नीत-विकासं प्रति अग्रेसरति। अवसरेह्यस्मिन् स्वामिनो विवेकानन्दस्य वचान्सि स्मरामि। सः अवोचत् - 'the idea of perfect womanhood is perfect independence'- अर्थात् पूर्ण-नारीत्वस्य विचारः एव सम्पूर्णा स्वाधीनतास्ति।

सपाद-शत-वर्षेभ्यः प्राक् स्वामि-पादेन उदीरितोह्ययं विचारः भारतीय-संस्कृतौ नारी-शक्तेः चिन्तनम् अभिव्यञ्जयति। सम्प्रति,आर्थिक-सामाजिक-जीवनस्य प्रत्येकमपि क्षेत्रे महिलानां तुल्य-सहभागितायाः निर्धारणं हि अस्माकं सर्वेषां दायित्वमस्ति। वयं तस्याः परम्परायाः अङ्गत्वेन स्मः यत्र,पुरुषाणाम् अभिज्ञानं नारीभिः भवति स्म। यशोदा-नन्दनः, कौशल्या-नन्दनः, गान्धारी-पुत्रः, एतादृगेव आसीत् अभिज्ञानं कस्यचित् पुत्रस्य। अद्यत्वे अस्माकं नारी-शक्तिः स्वीयैः कार्यैः आत्मबलस्य आत्मविश्वासस्य च परिचयं प्रादात्। आत्मानं आत्मनिर्भरं व्यदधात्। ताः स्वयन्तु अग्रेसृताः सन्ति, युगपदेव, राष्ट्रं समाजमपि च अग्रेसरन्तेतुं नूतनं शिखरञ्च प्रापयितुं कार्याणि अकुर्वन्। परमार्थेन अस्माकं नूतन-भारतस्य इदमेव स्वप्नमस्ति -यत्र नारी समर्था शक्ता च स्यात्, देशस्य समग्र-विकासे समानतया सहभागिनी भवेत्। विगतेषु दिनेषु केनचित् महोदयेन अतितरां भद्रः परामर्शः प्रदत्तः। तेन परामर्शितं यत् मार्च-मासीये अष्टम-दिनाङ्के, 'महिला-दिवसस्य' आयोजनार्थं विभिन्नाः कार्यक्रमाः आयोज्यन्ते। किं प्रत्येकमपि ग्रामे पुरे वा यत्र मातरो भगिन्यो वा शतं वर्षाणि पूर्णतां नीतवत्यः, तादृशीनां सम्मान-कार्यक्रमाः आयोजयितुं शक्यन्ते वा? किं तेषु च दीर्घ-जीवनस्य अनुभव-वर्णनं कर्तुं शक्यते वा? विचारोह्ययं मह्यम् अरोचत, अतः भवतः प्रति प्रापयामि। नारी-शक्तिः किं किं कर्तुं शक्नोति? तद्-विषये भवन्तः भूयान्सि उदाहरणानि अवाप्स्यन्ति। नातिचिरमेव, झारखण्डतः मया वृत्तम् अधिगतम्।'स्वच्छ भारत अभियानस्य' अन्तर्गतं झारखण्डे प्रायेण [15] पञ्चदश-लक्षं महिलाः सम्भूय मासावधिकं स्वच्छताभियानं प्रचालितवत्यः। ऐषमः जान्युआरिमासे षड्विंश-दिनाङ्कतः आरब्धस्य अस्य अभियानस्य अंतर्गतं केवलं विंशतौ दिनेष्वेव एताः महिलाः सप्तति-सहस्राधिक-लक्ष-मितान् शौचालयान् निर्मीय नूतनं कीर्तिमानं प्रतिष्ठापितवत्यः। भवन्तः कल्पयितुं शक्नुवन्ति यत् एषा कियती महती घटना वर्ततेश! झारखण्डस्य एताः महिलाः प्रदर्शितवत्यः यत् नारी-शक्तिः, स्वच्छ-भारतस्य अभियानस्य तादृशी शक्तिः अस्ति या हि, सामान्य-जीवने स्वच्छतायाः अभियानम्, स्वच्छतायाः संस्कारान् च प्रभावितया जन-सामान्यस्य स्वभावे नूनं परिवर्तयिष्यति।

भ्रातरो भगिन्यश्च, सद्यः दिवस-द्वय-पूर्वमेव अहं वार्ताः अवलोकयन् आसम् यत् एलीफेंटा-द्वीपे ग्राम-त्रये स्वाधीनतायाः सप्ततेः वर्षाणाम् अनन्तरम्, विद्युत् प्राप्तास्ति तथा च, एतदर्थं तत्रत्याः जनाः हर्षोल्लासेन समुत्साह-सन्दोहेन च प्रसन्नाः प्रतीयन्ते स्म। भवन्तः सर्वे सम्यक्तया अवगच्छन्ति यत्एलीफेंटा-द्वीपः, मुंबईतः समुद्रे एव दश-किलोमीटर-मितान्त- रालेन दूरे वर्तते। अयं द्वीपः पर्यटनस्य अतितरां बृहदाकर्षक-केन्द्रत्वेन अस्ति। एलीफेंटा-गुहाः,हृश्यस्थ्ह -इत्यस्य विश्व-रिक्थ-रूपाः सन्ति। तत्र प्रतिदिनं देश-विदेशेभ्यः बृहन्-मात्रिकाः पर्यटकाः आयान्ति। इदं हि महत्वपूर्णम्, पर्यटक-केन्द्रं वर्तते। अहं तत्रत्यं प्रशासनम्, जनान् च वर्धापयामि प्रसीदामि-तरां यत् इतः परं एलीफेंटा-ग्रामः एलीफेंटा-गुहाश्च विद्युद्‌ः प्रकाशेन सततं प्रकाशिष्यन्ते। नैतत् केवलं विद्युद्-वृत्तम्, अपि तु, विकास-क्रमस्य अभिनवः प्रारम्भः अस्ति। देशवासिनां जीवनानि प्रकाशितानि स्युः, तेषां जीवनेषु प्रसन्नता भवेत् चेत्यतः परं किमधिकं तोषप्रदं सुखप्रदं वा स्यात्?

मम प्रियाः भ्रातरः भगिन्यश्च, नातिचिरम्, वयं शिवरात्रि-महोत्सवम् आयोजितवन्तः। इतः परं मार्च-मासे शस्य-प्रफुल्लितानि क्षेत्राणि, सुवर्ण-निभाः क्रीडन्तः गोधूमाग्रभागाः तथा च मानसानन्द-दायिन्यः आम्र-मञ्जर्यः तासाञ्च शोभा - एतत्-सर्वमपि अस्य मासस्य वैशिष्ट्यमस्ति। परञ्च, मासोह्ययं होलिका-पर्वणः मासः इति कृत्वा अस्मभ्यः सर्वेभ्यः प्रियः अतितरां रोचतेच। मार्च-मासे द्वितीये दिने अशेष-देशः होलिकोत्सवं हर्षोल्लासेन आयोजयिष्यति। होलिका-पर्वणि यावत् महत्वम्, रंगानां अस्ति, तावदेव महत्वम्,'होलिका-दहनस्यापि' वर्तते यतो हि दिनमिदं दुर्वृत्तं अग्नि-राशौ दाहयित्वा तन्निरसनस्य दिनमस्ति। होलिका-पर्व, सर्वान् मनोमालिन्य-भावान् अपाकृत्य विस्मृत्य च सम्भूय उपवेशनस्य, मिथः सुखम् आनन्दञ्च संभाजयितुं शुभावसरत्वेन वर्तते, एतच्च, प्रेम्नः एकतायाःबन्धुत्वस्य च सन्देशं ददाति। भवतः सर्वान् देशवासिनः होलिका-पर्वणः रंगोत्सवस्य च भूयान्सि अभिनन्दनानि, मङ्गल-कामनाश्च, रंग-पूर्णाः शुभकामनाः। पर्वेदं अस्माकं देशवासिनां जीवने विविध-वर्णयुतां प्रसन्नताम् आपूरयेत् इत्येव हार्दिकी शुभकामना। मम प्रियाः देशवासिनः, कोटिशो धन्यवादाः, नमस्कारः।

### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

### पाठकानां कृते सूचनाः-

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कं रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# महाकविभासविरचितस्य 'ऊरुभङ्गम्' इत्यस्य संस्कृतनाटकस्य मञ्चनम्

(१९ फरवरी तः २६ फरवरी २०१८ पर्यन्तम्)

वार्ताहरः **डॉ. हरीशचन्द्र गुरुरानी हरिद्वारम्।** उत्तराखण्ड संस्कृत अकादम्या (उत्तराखण्डसर्वकारेण) संस्कृतस्य प्रचाराय, प्रसाराय, संस्कृतनाट्यविधायाः संवर्धनाय उत्तराखण्डप्रदेशस्य 08 स्थानेषु देहरादून-ऋषिकेश-नवटिहरी-रुद्रप्रयाग- कर्णप्रयाग-स्याल्दे देहरादूने, 20 ऋषिकेशे, 21 नवटिहरीनगरे, 22 रुद्रप्रयागे, 23 चमालीजनपदस्य कर्णप्रयागे, 24 अल्मोडाजनपदस्य स्याल्देग्रामे, 25 ऊधमसिंहनगरजनपदस्य काशीपुरनगरे, 26 हरिद्वारे उत्तराखण्ड-आयुर्वेदविश्वविद्यालयस्य ऋषिकुलपरिसरे महता दुर्योधनस्य मुखात् नीतिवचनानि निष्कासितम्, तत्र दुर्योधनः मरणकाले सुपुत्रं दुर्जयम् उपदिशति यत् सर्वैः सह प्रेम्णा व्यवहारं करोतु, सर्वे पाण्डवाः भवतः भ्रातरः एव सन्ति इत्यादय।

डॉ. गुरुरानिना उक्तं यत् संस्कृतनाट्ययात्राकाले तद्तद् स्थानेषु




(अल्मोडा)-काशीपुर-हरिद्वारे च महाकविभासविरचितस्य 'ऊरुभङ्गम्' इत्यस्य संस्कृतनाटकस्य मञ्चनं विधाय संस्कृतनाट्ययात्राः आयोजिताः।

उत्तराखण्डसंस्कृताकादम्या सचिवेन गिरधरसिंह भाकुनिना उक्तं यत् संस्कृतम् अस्माकं राष्ट्रस्य निधिः अस्ति। संस्कृतं बिना वयं भारतीयसंस्कृतिं, ज्ञानं विज्ञानं, संस्कारं, सभ्यतां च ज्ञातुं न शक्नुमः। संस्कृतं केवलं भाषा नास्ति, संस्कृतस्य तु वैज्ञानिकचिन्तनस्य मूलाधारोऽपि अस्ति। अतः सर्वैरपि भारतीयैः संस्कृतस्य संवर्धनं अनिवार्यरूपेण करणीयम्।

सचिवः गिरधरसिंह भाकुनी अवदत् यत् अकादम्या संस्कृतस्य प्रचाराय अनेके कार्यक्रमाः आयोज्यन्ते, किन्तु नाटकं मनोरञ्जकं भवति, सामान्यजनाः अपि अभिनयेन एव संस्कृतं ज्ञातुं शक्नुवन्ति। अतः सम्प्रति संस्कृतनाट्ययात्रायाः आयोजनं कृतम्। तेनोक्तं संस्कृतनाटकस्य प्रशिक्षण 05 फरवरीतः 18 फरवरी पर्यन्तम् अकादम्यां समभवत्। तदनन्तरं संस्कृतनाट्ययात्रायाः 19 दिनाङ्के वैभवेन संस्कृतनाट्ययात्रायाः समाप्तिः अभवत्। नाट्यदले 30 जनाः ग्रामे ग्रामे नगरे नगरे गत्वा संस्कृतस्य प्रचारं कृतवन्तः।

संस्कृतनाटकस्य निर्देशकः हेमवतीनन्दनबहुगुणागढवालकेन्द्रीयविश्वविद्यालयस्य कलासंस्कृतिविभागस्य सहायकाचार्यः डॉ. अजीत पंवारः, सहनिर्देशकः प्रसिद्धरंगकर्मी दिनेश भट्टः, संगीतज्ञः जयप्रकाश राणा च प्रमुखरूपेण आसन्।

संस्कृतनाट्ययात्रायाः संयोजकः अकादम्या शोधाधिकारी डॉ. हरीशचन्द्र गुरुरानी उक्तवान् यत् संस्कृतस्य सामान्यजनानाम् बोधाय इयं संस्कृतनाट्ययात्रा आयोजिता। डॉ. गुरुरानी अवदत् यत् महाकविभासेन कथम् 'ऊरुभङ्गम्' इत्यस्य संस्कृतनाटकस्य माध्यमेन समाजाय शिक्षा प्रदत्ता यत् यदा मानवे धनबलं, मदबलं, अहङ्कारश्च भवति तदा सः नीतिं न जानाति, उचितानुचिते भेदं कर्तुं न शक्नोति, किन्तु यदा सः असहाय्य भवति तदा सः सर्वामपि नीतियुक्तां वार्तां करोति। अस्मिन् नाटकेऽपि महाकविभासेन कार्यक्रमेषु अतिथिरूपेण पूज्याः श्रीस्वामिचिदानन्दमुनिमहाराजसहिताः, संस्कृतविद्वांसः, अनेके विधायकाः, अधिकारिणः, नगरपालिकाध्यक्षाः, गणमान्याः उपस्थिता आसन्। संस्कृतनाटकं द्रष्टुं ग्रामजनाः अबालवृद्धाः, नगरस्य अनेके गणमान्याश्च उपस्थिता आसन्।

नाट्ययात्रायाः सहसंयोजकः अकादम्याः प्रकाशनाधिकारी किशोरीलाल रतूडी, दिनेश मेहरा, पंकज नेगी सहयोगीरूपेण आसन्। नाटकस्य पुरुषपात्ररूपेण गोपाल बडोनी-सूत्रधारः, केशव नौडियालः-भाटः, कृष्णकान्तः-भाटः, विमलसेमवालः-भाटः, नरदेव गोदियालः-भाटः, पंकज गोदियालः-बलदेवः, सौरभ जोशी-दुर्योधनः, विपिन जोशी-धृतराष्ट्रः, अभिषेकपोखरियालः-दुर्जयः, सागर सुन्दरियालः-अश्वत्थामा। स्त्रीपात्रेषु अल्का पैन्यूली-गान्धारी, बबीत रगडवाल-भाट, दीपशिखा-पौरवी, तनुजा पाण्डेया-मालवी इत्यादयः उत्तराखण्डस्य विद्यालयीयशिक्षायाम् अधीयानाः छात्रा आसन्।

---

# साम्प्रतं वयं अनुकरणं कुर्मः इति दुःखास्पदम्-डॉ श्रेयांश द्विवेदी

वार्ताहरः अमनः तरावड़ी, करनाल, हरियाणा। अद्य करनाल जनपदस्य तरावडीस्थ राजकीय आदर्श संस्कृति वरिष्ठ माध्यमिक विद्यालये हरियाणा संस्कृत अकादमी द्वारा नगरे नगरे भगवद्गीता जने जने संस्कारः इति कार्यक्रमः समायोजितः। अवसरेस्मिन् विद्यालयस्य प्राचार्यः श्री दिलराज महोदयः मुख्याध्यापकः श्री सुदर्शन महोदयश्च मुख्यवक्ता डॉ श्रेयांश द्विवेदिनां मुख्यातिथिः सेठ साधुराम सिंगला उद्योगपति महोदयानां विशिष्टातिथीनां डॉ ओमप्रकाश शर्म डॉ सत्यपाल शर्म महोदयानाञ्च स्वागतम् कृतवन्तः। अवसरेस्मिन् मुख्यातिथिः डॉ श्रेयांश द्विवेदी महोदयः उक्तवान् यदि वयं प्रसन्नतां वाञ्छामः चेत् यस्मिन् विषये यस्मिन् क्षेत्रे अध्ययने अस्माकं सामर्थ्यं तदेव अस्माकं अध्ययनक्षेत्रं कार्यक्षेत्रं वा भवेत्। साम्प्रतं वयं अनुकरणं कुर्मः इति दुःखास्पदम्। अस्माभिः सर्वैः गीता, रामायणं प्रभृति ग्रन्थानां निरन्तरम् अध्ययनं कर्तव्यम्। डॉ द्विवेदी महोदयः हरियाणा



संस्कृत अकादमी गतिविधयः सविस्तरं प्रतिपादयन् उक्तवान् यत् अकादमी द्वारा संस्कृत गोष्ठ्यः, सम्मेलनानि, छात्रवृत्तिप्रदानम्, विदुषां सम्माननम्, लेखकानां सम्माननम्, प्रतियोगिताः, संस्कृतसम्भाषणशिबिरम्, भाषाबोधनवर्गः, संस्कारप्रदातुं 'नगरे नगरे भगवद्गीता जने जने संस्कारः' प्रभृतयः कार्यक्रमाः सञ्चाल्यन्ते।

अवसरेस्मिन् दिलराज प्राचार्यः राजकीय आदर्श संस्कृति वरिष्ठ माध्यमिक विद्यालयः, तरावड़ी, श्रीमान् साधूराम सिंहला,उद्योगपतिः तरावड़ी। सुदर्शन शर्मा , मुख्याध्यापकः श्री अनिल शर्मा प्राचार्यः राजकीय वरिष्ठ माध्यमिक विद्यालयः तरावड़ी। डॉ विश्वम्भर जी श्री शिवरामः जी, श्री अमनः , श्री संजयः , श्री नवीन गुप्ता, श्रीमती गायत्री, श्रीमती नीलम , श्री हरीशः डॉ सत्यपालः, प्राचार्यः राजकीय वरिष्ठ माध्यमिक विद्यालयः कुञ्जपुरा, डॉ ओमप्रकाशः राजकीय आदर्श वरिष्ठ माध्यमिक विद्यालय कुरुक्षेत्रम्।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, शुभम् आर्य, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।